

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible] णकान [illegible] ण्धानिकल्पन । श्री [illegible] निधिज्यन सथवा
[illegible] नचरितार्थत्वादुपदेशमतंविदं ॥१॥

॥अथआश्वलायनसूत्रवृत्तीप्रारंभः॥

ACC. No:- ~~2426~~ M1063
Title:- आश्वलायन सूत्र वृत्ती
Author:- नारायण.
Subject:- vedic ritual
पत्रे:- 100

K K S U LIBRARY
RAMTEK
441 106
M1063
Dist. Nagpur

1

Checked 2012

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ श्रीआश्वलायनाचार्याय नमः ॥ प्रज्ञानानंदमूर्तिः सकलदिगतिगः सर्वे
दासन्नेयशः सर्वस्मात्स्वप्रकाशः स्थिरचरनिलयः प्रत्यगात्मा स देवः ॥ श्रौतस्मार्तक्रिया
त्माश्रुतिमननिदिध्यासवैराग्यलब्धः सब्रह्मा विष्णुरीशः सकलमपि जगत्सर्वदाव्यादसौ
नः ॥१॥ ग्रासोपरागनिर्मुक्तस्वप्रकाशमनाकुलं ॥ गंभीरबोधमानंदं नमामि ब्रह्म शाश्वतं
॥२॥ आश्वलायनसूत्रस्य भाष्यं भगवता कृतं ॥ देवस्वामिसमाख्येन विस्तीर्णसदनाकुलं ॥३
तत्प्रसादान्मयेदानीं क्रियते वृत्तिरीदृशी ॥ नारायणेन गार्ग्येण नरसिंहस्य सूनुना ॥४॥ ॥

॥१॥ ॐ अथैतस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामः ॥ लौकिकानि प्रत्याम्नायप्रयोगशा
स्त्राणि स्मर्यन्ते ॥ तत्रांगांगिनोरनुष्ठानोपयोगिकैतया अध्ययनविध्याक्षिप्तत्वात्तत्राम्ना ॥१॥
यमंगत्वं प्रतिपन्नानि ॥ तत्रांगांगिनोरनुष्ठानुक्रमानंतर्यमथशब्दो द्योतयति ॥ एतस्ये
ति शब्दो निर्विशेषपुरोरुक्तां तापवालखिल्यमहानाम्न्यैतरेयब्राह्मणसहितस्य शाकल
स्य बाष्कलस्य चाम्नायद्वयस्य एतदाश्वलायनसूत्रं नाम प्रयोगशास्त्रमित्यध्येतृप्रसि
द्धं संबंधविशेषं द्योतयति ॥ समाम्नायस्येत्युच्यते ॥ एतस्यैव सम्यगभ्यासयुक्तस्येदंशा
स्त्रं न खिलानां सम्यगभ्याससहितानामिति ॥ वितन्यंतेऽग्नयो यस्मिन्निति श्रौतकर्मजातं तमि
ग्निहोत्रादि वितानशब्देनोच्यते ॥ समाम्नायस्य वितान इति विशेषणाद्योतते चैव खिलर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः॥ श्रीआश्वलायनाचार्याय नमः॥ प्रशान्तानंदमूर्तिः सकलदिगतिगः सर्व
दासन्नेयशः सर्वस्मात्स्वप्रकाशः स्थिरचरनिलयः प्रत्यगात्मा स देवः॥ श्रौतस्मार्तक्रिया
त्मा श्रुतिमनननिदिध्यासवैराग्यलब्धः सब्रह्माविष्णुरीशः सकलमपि जगत्सर्वदाव्यादसौ
नः॥१॥ ग्राह्योपरागनिर्मुक्तं स्वप्रकाशमनाकुलं॥ गंभीरबोधमानंदं नमामि बलशाश्वतं
॥२॥ आश्वलायनसूत्रस्य भाष्यं भगवता कृतं॥ देवस्वामिसमाख्येन विस्तीर्णसदनाकुलं॥३
तत्र सारान्मयेदानीं क्रियते वृत्तिरीदृशी॥ नारायणेन गार्ग्येण नरसिंहस्य सूनुना॥४॥॥
ओं अथैतस्य समाम्नायस्य वितानेयोगापत्तिं वक्ष्यामः॥ लोकेयानि प्रत्याम्नायं प्रयोगशा
स्त्राणि स्मर्यंते॥ तत्रांगांगिनोरनुष्ठानोपयोगिकैतया अध्ययनविध्याक्षिप्तत्वात्प्रत्याम्ना ॥१॥
यमंगत्वं प्रतिपन्नानि॥ तत्रांगांगिनोरनुष्ठानुक्रमानंतर्यमथशब्दो द्योतयति॥ एतस्ये
ति शब्दो निर्दिष्टेषु पुरोरुक्तं तापवालखिल्यमहानाम्न्यैतरेयब्राह्मणसहितस्य शाकल
स्य बाष्कलस्य चाम्नायद्वयस्य एतदाश्वलायनसूत्रं नाम प्रयोगशास्त्रमित्यध्येतृप्रसि
द्धं संबंधविशेषं द्योतयति॥ समाम्नायस्येत्युच्यते॥ एतस्यैव सम्यगभ्यासयुक्तस्येदं शा
स्त्रं न खिलानां सम्यगभ्यासरहितानां मिति॥ वितानाख्ययोयस्मिंनिति श्रौतकर्मजातं ते
ग्निहोत्रादि वितानशब्देनोच्यते॥ समाम्नायस्य वितान इति विशेषणाद्योतने वैवाखिल र

नन्यः

गुणदोष

वि

॥१॥

तान्य

२

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यास्या

नं स्यादग्न्याधेयप्रभृतित्वं विहन्येत॥ आधानस्याग्न्यर्थत्वे च नायं दोषः॥ अतो बहुवचनेनाधान
स्य चाग्न्यर्थत्वं साधितं भवति॥ तस्मादनाहिताग्नेः क्षामवत्यादयो न भवति॥ अवकीर्णिनाप
प्यर्थमाधानं कर्तव्यमिति साधितं भवति॥ न परस्तात् [illegible]मूलमिति साधितं भवति॥ अस्मिं
स्तुशास्त्रे अनिबद्धस्य स्वाम्नाये दृश्यमानस्य श्रुतित एव प्रयोगसिद्धिर्भवति॥ श्रौतेः स्वातं
त्र्यकीर्तनादिति॥ आधानस्य प्रथममनुष्ठेयत्वात्प्रथमं तदेव वक्तव्यमित्यत आह॥ दर्श
पूर्णमासौ तु पूर्वं व्याख्यास्यामस्तंत्रस्य तत्राम्नातत्वात्॥ दर्शपूर्णमासौ यथासंख्येन सू
र्याचंद्रमसोरस्तं तं संनिकृष्टविप्रकृष्टदेशस्थितिलक्षणवचनौ तद्योगादहोरात्रवचनौ ॥२॥
तद्योगादेव कर्मवचनौ॥ अत्र तु कर्मवचनौ॥ पश्चात्प्रयोज्यवचनोऽपि दर्शशब्दोऽल्पाच्तर
त्वात्पूर्वं निपात्यते॥ तुशब्दो विशेषद्योतकः॥ तंत्रमंगसंहतिः विध्यंत इत्यर्थः॥ स चान्वाधा
नादिः संस्थाजपांतः॥ प्रधानस्य तंत्रणात्तंत्रमित्युच्यते॥ तच्च दर्शपूर्णमासयोरेवाम्नातं।
नान्यास्विष्टिषु॥ अस्त्वेतत्तत्सापेक्षत्वादन्यासां तावेव पूर्वं व्याख्यातव्यौ स्यातां॥ एतदुक्तं
भवति। आधानस्य प्रथमप्रयोज्यत्वात् तस्मिन्नेव प्रथमं व्याख्यातव्ये सति तत्साध्यस्य
गार्हपत्यादेः पवमानेष्टिसापेक्षत्वात्ता अपि तत्रैव वक्तव्याः स्युः॥ उक्ता अपि विध्यंतसा
पेक्षत्वात्तस्य च दर्शपूर्णमासयोरेवाम्नातत्वात् तद्व्याख्यानमंतरेण तज्ज्ञानाभावा
दाहेत्यनेन सर्वमिदं शास्त्रं श्रुतिमूलमिति दर्शयति॥ तेनास्मिन् शास्त्रे यदृष्टं मूलं तदाम्नायांतरमू ३

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्प्रयोक्तुं नैव शक्यंते॥ अतो नेन विशेषेण तावेव पूर्वं व्यास्यामः॥ नाधानमिति सूत्रार्थः॥
इदानीं दर्शपूर्णमासयोर्व्याख्यानमारभते॥ दर्शपूर्णमासयोर्हविःषासनेषु होतामंत्रितः प्राग्
दगाहवनीयादवस्थाय प्राङ्मुखोयज्ञोपवीत्याचम्य दक्षिणाहोहारं प्रपद्यते पूर्वेणोत्करमपरे
ण प्रणीताः॥ दर्शपूर्णमासयोरित्यधिकारार्थं आध्याय परिसमाप्तेः॥ वाक्येन शेषिविशेषासं
युक्तस्योभयार्थत्वोय। हविरासादनमामंत्रणं चोभयसंगतमनेवेष्टिकस्य प्रवेशस्यानिमित्तं
होत्रमित्यृग्वेदस्य समाख्या॥ न ह्यदविहितानां पदार्थानां कर्ता होतेत्युच्यते॥ प्राङ्मुखत्वेस्थाना
चमनाभ्यां संबध्यते॥ मध्यगतस्य विशेषाग्रहणात्॥ यज्ञोपवीतं तावदाचमनार्थतया न
विधेयं स्मृतिप्राप्तत्वात्॥ अन्यार्थं च न भवति संबंधाभावात्॥ एकवाक्यत्वात्कत्रसंब (ग)
ध्यमानस्य च प्रयोजनाभावः स्मृतिप्राप्तत्वादेव॥ अतः स्मृतिप्राप्तमिहानूद्यते॥ स्मार्तानां
स्नानाचमनयज्ञोपवीतादीनां श्रौतकर्माविरुद्धानां अस्मिंछास्त्रे प्राप्तिदर्शनार्थं इमा
चमनं कर्मांगं विधीयते॥ शेषार्थं स्य गृहप्रवेशात्प्रागेव कृतत्वात्॥ तदुक्तं॥ मनःप्रसाद
त्सत्योक्त्या तपसा स्नानकर्मणा॥ आचांत्या चात्मनः शुद्धिं कृत्वा कर्म समारभेदिति॥ द
क्षिणाहंनाम दक्षिणं पार्श्वं मध्ये कृत्वा ऽवर्तते स दक्षिणावृत्। विक्रियंते ऽग्न्यादयो यस्मिंदे
शे स विहारः॥ उत्करो नाम उत्कीर्यंते वेदिपांसवो यस्मिंदेशे स उत्करः॥ प्रणीता नाम आपो मं
त्रसंस्कृताः आहवनीयस्योत्तरतो निहिताः॥ उत्करं प्रणीताश्चांतरेण यो देशस्तेन निर्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रंप्रपद्यते ॥ एतदुक्तं भवति । स्नात्वा चमस्य यज्ञोपवीती भूत्वा हविधासंनेषु आमंत्रितश्च संन्नो ॥ आगु ...
हवनीयाद्यो देशस्तेन विहारं प्रपद्यत इति । उत्करप्रणीताग्रहणादेव विहारग्रहणे सिद्धे यद्विहारग्रहणं त
त्सर्वः कर्ता सर्वकर्मणि विहारप्रपदनं कुर्वं दक्षिणार्द्धं भूत्वा एतेन यथाप्रपद्येतैत्येवमर्थं ॥ इध्ममपरेणाप्र
णीते ॥ यदनोपधिर्हविष्कं कर्म तदप्रणीतमिहोच्यते ॥ हविःश्रपणार्थत्वात् ॥ प्रणीतानां तस्मिन्निध्ममप
रेण प्रपद्यते ॥ प्रणीतास्तत्र न संतीति ॥ चात्वालं चात्वालवत्स्य ॥ चात्वालो नामाऽवटः परूसो मादि ध्रुष
स्तियेषु उत्तरवेद्यर्थं यत्र मृत्तवाल्लावद्धियते । तद्दुत्क्रते पुनमपरेण प्रपद्यते । सर्वत्रोत्करः पश्चिमावधिः ।
एतत्तीर्थमित्याचक्षते ॥ एतमध्वानं तीर्थमित्याचक्षते वेदविदः ॥ आचक्षत इति ब्रुवन्नैदिकीयं संज्ञा ॥ न
॥३॥ पारिभाषिकीति दर्शयति । उत्करायभावेपि सदेशस्तीर्थसंज्ञकः एव देशलक्षणार्थत्वादुत्करादीनां ग्रह ॥३॥
णस्येति ॥ अतोऽग्निहोत्रादिष्वपि तेनैव यथाप्रपदनं सिद्धं भवति ॥ तस्य नित्याः प्रांचश्चेष्टाः ॥ पद्धस्त
त्राणि सर्वार्थानि तदर्थं तस्येति विशेषणं कृतं । असत्यस्मिन्हेतुः प्रकृतत्वात् तस्यैव मे विधयः स्युः ॥
अस्मिंस्तु सति तस्येति विशेषणं कृतवानाचार्यः ॥ नित्या इत्यनेन प्राक्चेष्टतायाः नित्यत्वं न वि
धानत्वं विहितत्वादेव स्वरूपनित्यत्वयोरेव सिद्धत्वात् ॥ अतस्यैषोऽर्थः ॥ तस्य बाह्यानां चेष्टानां
उपरमेपि मनोवाक्कायव्यंत्रणाद्यो नित्या एवेति । प्रांच इति शब्दपूर्वदिग्वाचि बहुवचनांतः ॥ चेष्टा
इति क्रियावाचि स्त्रियां बहुवचनांतः ॥ प्रांच इत्यत्र पुंस्त्वः प्राक्त्वेन संबंधाभावात् क्तेनुः प्राङ्मुखत्वं विधी
यते । चेष्टाशब्दबहुगतवचनेनास्य बहुत्वस्य सामानाधिकरण्यादेव चेष्टानां प्राक्त्वं विधीयते तासा
ममूर्तत्वात्त्वनः प्राक्त्वासंभवात् तत्साधनेषु प्रागग्रतातासां च प्राच्येव पवर्ग इति एवं विधिबला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्भवति। एतदुक्तं भवति। यो यस्तीर्थेन विहारं प्रपन्नस्तस्य तस्य प्रवृत्तिः क्रमणान्मनो वाक्काययंत्रणा
द्यो नित्याः स्युः॥ कर्तुश्च प्राङ्मुखत्वं चेष्टानां च प्रागपवर्गता तत्साधनानां च प्रागग्रतेति विषमस्स
त्रप्रणयनेन व्याख्यानतो विशेषप्रतिपत्तिर्निःसंदेहादलक्षणमित्येषा परिभाषा संगृहीता भवति॥
अंकधारणा च॥ अंकमूरुप्रस्थस्तस्य करणं दक्षिणोत्तरेणोपस्थेनेति वक्ष्यमाणरूपधारणेत्युच्यते
सा च नित्या भवेदुपवेशानुकाला दारभ्याकर्मपरिसमाप्तेरविच्छेदेन कार्येत्यर्थः॥ अंकधारणस्योपवे
शनांगत्वेन प्राप्तस्याहवनीयपरिहारायैव नित्यत्वेपि प्राप्ते तन्नित्यतावचनं॥ नपत्नीसंयाजिके अं
निरस्यतामित्येवमादिषूपवेशनेषु मंत्रनिषेधोपि वक्ष्यमाणस्योपवेशनप्रकारस्य नित्यत्वे नप्रा
पणार्थं मंत्रविध्यसंबंधेष्वपि अग्निहोत्रादिषु वक्ष्यमाणोस्येवोपवेशनस्य प्रापणार्थं च॥ यज्ञोपवीतशौ
चे च॥ पूर्वस्य यज्ञोपवीतग्रहणस्य स्मार्तानां प्रापणार्थत्वां निवीतप्राचीनावीतयोर्मनुष्यपैतृकयोः
कर्मणोः स्मार्तत्वेन प्राप्तौ सत्यां नियमार्थमिदमुच्यते॥ ×लक्षण× यत्र निवीतप्राचीनावीते विधीये
ते तत्रैव ते भवतो न मानुषपैतृकं वा कर्म दृष्ट्वेति तयोर्विध्यभावे यज्ञोपवीतमेवेति नियम्यते। देश
स्यांगप्रधानार्थत्वादिकाभक्षणादेश्चांगत्वादस्य च विहारदेशप्राप्तौ सत्यामेव शौचग्रहणेन नि
यम्यते। क्रत्वर्थमप्युपस्पृश्य चित्तसंपादियतद्विहारान्निष्क्रम्य बहिः कर्तव्यं अंतर्विहारेशुचिरेव नित्यं
स्यादिति॥ विहारादव्यावृत्तिश्च तत्र चेत्कर्म॥ व्यावृत्तिः पृष्ठतः कृतिः न विहारं पृष्ठतः कुर्यात्तत्र चे
द्विहारमकुर्वन्भवेत्प्रयोगमध्येपि कर्म कुर्वतामेवायं नियमो नोपरतकर्मणामित्यर्थः॥ अतो
विहारव्यावृत्तिनिषेधात्पश्चादस्योपविश्य पश्चात्तस्याधिष्ठस्योपविशति॥ पश्चादुत्तरवे
देरुपविश्याध्वर्युरित्येवमादौ मध्यरेखायामपक्रम्योत्तरतउपविशेत्। चशब्दस्त्रिषु सूत्रेषु नित्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मयोक्तुं नैव शक्यंते ॥ अतोनेन विशेषेण तावेव पूर्वं व्याख्यास्यामः ॥ नाधानमिति सूत्रार्थः ॥
इदानीं दर्शपूर्णमासयोर्व्याख्यानमारभ्यते । दर्शपूर्णमासयोर्हविःप्रासनेषु होतामंत्रितः प्रागु
दगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षिणाहीं हारं प्रपद्यते पूर्वेणोत्करमपरे
ण प्रणीताः ॥ दर्शपूर्णमासयोरित्यधिकारार्थं आध्यायपरिसमाप्तेः । वाक्येन शेषिविशेषासं
युक्तस्योभयार्थत्वाय । हविरासादनमामंत्रणं चोभयं संगतमनेवैदिकस्य प्रवेशस्यातिमित
होत्रमित्यृग्वेदस्य समाख्या ॥ नह्येदविहितानां पदार्थानां कर्ता होतेत्युच्यते ॥ प्राङ्मुखत्वस्थाना
चमनाभ्यां संबध्यते ॥ मध्यगतस्य विशेषाग्रहणात् ॥ यज्ञोपवीतेतावदाचमनार्थतया न
विधेयं स्मृतिप्राप्तत्वात् । अन्यार्थं च न भवति संबंधाभावात् । एकवाक्यत्वात्कत्रसंब (ग)
ध्यमानस्य च प्रयोजनाभावः स्मृतिप्राप्तत्वादेव ॥ अतः स्मृतिप्राप्तमिहानूद्यते ॥ स्मार्तानां
स्नानाचमनयज्ञोपवीतादीनां श्रौतकर्माविरुद्धानां अस्मिंछास्त्रे प्राप्तिदर्शनार्थमा
चमनं कर्मांगं विधीयते ॥ शौचार्थस्य गृहप्रवेशात्यागेव कृतत्वात् ॥ तदुक्तं ॥ मनःप्रसाद
त्सत्योत्त्स्यात्तपसात्स्नान कर्मणा ॥ आचांत्या चात्मनः शुद्धिं कृत्वा कर्म समारभेतदिति ॥ द
क्षिणाहं नाम दक्षिणं यागर्भमध्ये कृत्वाऽवर्तते स दक्षिणावर्त्तः । विहृयन्तेऽग्न्यादयो यस्मिंदे
शे स विहारः । उत्करो नाम उत्कीर्यंते वेदिपांसवो यस्मिंदेशे स उत्करः प्रणीता नाम आपोमं
त्रसंस्कृताः आहवनीयस्योत्तरतो निहिताः ॥ उत्करं प्रणीताभ्यांतरेण यो देशस्तेन निर

(8)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जुहोति जपति कर्तारं ब्राह्मणं विद्यात्। जपशब्देनात्र साहचर्यात् जपादिषु दृश्यते। तस्मि
न्कर्मणि मुख्यजपस्याभावात्। एवं च सति कर्मकरणत्वेन होममंत्रस्यापि ग्रहणं सिध्येत्
जुहोतिग्रहणं तर्हि जपग्रहणेन होममंत्राणां गृह्यते इत्येवमर्थं॥ तेन विद्यायां जपादिलोपेपि
होममंत्रान् कुर्यात्। ऋचं पादग्रहणे॥ पादशब्दोत्र मूलवाची। ऋचः। मूलग्रहणे ऋचं विद्यात्
त्वमग्ने वसूंस्त्विह त्वैतवदित्याद्युदाहरणानि॥ अधिके तृचं सर्वत्र॥ अधिके पादे गृह्यमाणे तृ
चं विद्यात्। सर्वत्र सूक्तादावसूक्ते। एषोऽर्थः। अग्न आयाहि वीतये गृणान ईळेन्यो नमस्यस्ति
रस्त्याद्युदाहरणानि। जपानुमंत्रणाप्यायनोपस्थानान्युपांशु॥ सर्वत्रशब्दोत्रापि संबध्य
ते मध्यगतस्य विशेषाग्रहणात् प्रयोजनवत्वाच्च। अस्मिंछास्त्रे यानि जपादीनि तान्युपांशु
प्रयोक्तव्यानि॥ मंत्राश्च कर्मकरणाः॥ चशब्देन सर्वत्रेत्युपांश्विति चानुकृष्यते॥ मंत्राः कर्मकरणा
श्चोपांशु प्रयोक्तव्याः। उपांशुत्वस्येदं लक्षणं। करणवदशब्दं मनःप्रयोग उपांश्विति। जपादीनां ष
ण्णां लक्षणमुच्यते। जपमनुच्चारणं विद्यात् क्रत्वर्थमपि तद्भवेत्। अर्थतः कार्यलाभश्चेदर्थ एव कृतो
भवेत्॥ मंत्रमुच्चारयन्नेनं मंत्रार्थत्वेन संस्मरेत्। शेषिणं तन्मना भूत्वा स्यादेतदनुमंत्रणं। एतदे
वाभिमंत्रस्य लक्षणं वीक्षणाधिकं। अद्भिः संस्पर्शनाधिक्यात्तदेवाप्यायनं स्मृतं। उपस्थानं
तदेव स्यात् प्रणतिस्थानसंयुतं। बाह्यं कार्यं यदेतेषु मंत्रकाले क्रियेत तत्। कर्मणः करणास्ते स्युः
विहितार्थप्रकाशनात्। मंत्रेण कृत्वा मंत्रांते क्रियते कर्म येषु तु। इदं कार्यमनेनेति न कश्चिद् दृश्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधिः॥ लिंगादेवेदमर्थत्वं येषां ते मंत्रसंज्ञिताः॥ अनुमंत्रग्रहणेनाभिमंत्रणमपि गृह्यते। अनुमंत्र
णाप्यायनोपस्थानानां कर्मकरणत्वाविशेषेपि यत्पृथक्ग्रहणं तन्मंत्रान्ते कर्मारंभ इति कर्मकरणध
र्मो यः स तेषु न भवतीत्येवमर्थं। तेन मंत्रोच्चारणसमकालमेव तेषु क्रिया भवति॥ प्रसंगादपवादो
बलीयान्॥ सामान्यविधेर्विशेषविधिर्बलीयानित्यर्थः॥ लोकवेदप्रसिद्धस्यान्यायस्य वचनप्र
योजनं। सर्वेऽपवादाः प्रसंगस्यैव बाधका नापवादाः सावकाशत्वे परस्परं बाधका इत्येवमर्थं।
अतः स्वाद्रुद्विलीयात्क्रम्याहवनीयोत्तरयोः प्रणवयोर्मध्ये प्रतिगरो तयोः प्रणवरूपः प्रतिगरो न बा
॥५॥ धको भवति॥ प्रपद्याभिहृततरेण पादेन वेदिश्रोण्योत्तरया पार्ष्णी समानिधाय प्रपदेन बहिरा ॥५॥
क्रम्य संहितौ पाणी धारयन्नाकाशवत्संगुलीहृदयसंमितावंकसंमितौ वा द्यावापृथिव्योः सं
धिमीक्षमाणः॥ तिष्ठेदिति शेषः। तीर्थेन विहारं प्रपद्यत इत्युक्तं तत्र केन पदविक्षेपेण बहि
र्विहारादंतर्विहारप्रपदनं कर्तव्यं दक्षिणांगप्रत्यय इव सिद्ध एव। इदानीं प्रपद्येत्युच्यते। अ
वेदिश्रोण्युत्तरप्रपदनं तस्य सर्वस्य विहितत्वसिद्ध्यर्थं। अभिहृततरेणेति वचनं अनेकप
दविक्षेपसाध्यत्वादस्य प्रपदनस्य सर्वेषु च पदविक्षेपेषु दक्षिणस्याग्रतो हरणसिद्ध्यर्थं।
वेदेः परार्ध्याः श्रोणिरिति संज्ञा। पूर्वाश्च्यो रंस इति संज्ञा। पादस्यापरो भागः पार्ष्णिः। पूर्वः प्रप
दः। बहिर्वेद्यास्तीर्णन्तरणं। उत्तरायां श्रोण्यां दक्षिणस्य पादस्य पार्ष्णी समानिधाय तस्यैव प्र
पदेन वेद्यां स्तीर्णं बहिराक्रम्य बहिर्वेदि सव्यं निधाय आत्मनः सव्ये दक्षिणो हस्तोपि च दक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थक् विरलांगुलिकौ कृत्वा पुनस्तथाभूतावेव तौ पाणी परस्परं संहितौ च कृत्वा तौ हृदयसंमितावंकसंमितौ वा धारयन् द्यावापृथिव्योः संधिमीक्षमाणः नोर्ध्वं नापि तिर्यगवेक्ष्यमाणः उर्ध्वः प्राङ्मुखस्तिष्ठेत्॥ एतद्धोतुस्थानं॥ अयं स्थानशब्दो भावसाधनो नाधिकरणसाधनः। एतच्छब्देन श्रोणिदेशो हस्तपादादियंत्रणेन च विशिष्टं यत्पूर्वं संश्रोक्तं तदत्र स्थानशब्देनोच्यते इति प्रदर्श्यते। यत्र होतुस्थानं चोद्यते तत्र तत्स्थानं भवतीत्यर्थः॥ होतृग्रहणमुत्तरसूत्रस्य सर्वार्थित्वाय॥ आसनं वा सर्वत्रैवंभूतः॥ अयं वाशब्दश्च शब्दस्यार्थे वर्तते। स्थानं चासनं च सर्वत्र सर्वः कर्ता एवंभूतः कुर्यात् पूर्वोक्तहस्तपादादियंत्रणाविशिष्टेन श्रोणिदेशविशिष्ट इत्यर्थः॥ श्रोण्यादिषु सर्वेषु प्राप्तेषु श्रोणिदेशावर्जनेन कर्तृशरीरविशेषणानामेव प्रापणार्थमेवंभूतवचनं॥ वचनादन्यत॥ उक्तस्यान्यथाभावो यावन्मात्रस्य वचनं तावन्मात्रस्यैव न तु तत्संबंधिनोन्यस्यापीति। तेन होमार्थे क्रियमाणे दक्षिणस्य पाणेरपायेपि सर्वं होतुः स्थानं नापैतीति सिद्धं॥ प्रेषितो जपति॥ जैर्थस्य प्रेषस्याभावात्सामिधेन्यर्थं प्रेषितो होता॥ १॥ नमः प्रवक्त्रे नमउपद्रष्ट्रे न्या मोनुख्यात्रे क इदमनुवक्ष्यति स इदमनुवक्ष्यति षण्मोवदूरं हं सस्यानुद्योग्य पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्च वाक्समन्विता न पत्तः साधु च्छंदांसि प्रपद्ये हमेव मामनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जुहोति जपति कर्तारं ब्राह्मणं विंद्यात्। जपशब्देनात्र साहचर्यात् जपादिषु गृह्यते। तस्मि
न्प्रकरणे मुख्य जपस्याभावात्। एवं च सति कर्मकरणत्वेन होममंत्रस्यापि ग्रहणसिद्धेयत्
जुहोति ग्रहणं तेन जपग्रहणेन होममंत्रा न गृह्यंते इत्येवमर्थं॥ तेन पित्र्यायां जपादिलोपेपि
होममंत्रा न लुप्यंते। ऋचं पादग्रहणे॥ पादशब्दोत्र मूलवाची। ऋचः मूलग्रहणे ऋचं विंद्यात्
त्वमग्ने वसूंस्त्वं हि क्षैतवदित्याद्युदाहरणानि॥ अधिके तृचं सर्वत्र॥ अधिके पादे गृह्यमाणे तृ
चं विंद्यात्। सर्वत्र सूक्तादावसूक्तादौ चेत्यर्थः। अग्न आयाहि वीतये गृणान ईळेन्यो नमस्य स्ति
रस्याद्युदाहरणानि। जपानुमंत्रणाप्यायनोपस्थानान्युपांशु॥ सर्वत्र शब्दोत्रापि संबध्य
ते मध्यगतस्य विशेषाग्रहणात् प्रयोजनवत्वाच्च। अस्मिंश्छास्त्रे यानि जपादीनि तान्युपांशु
प्रयोक्तव्यानि॥ मंत्राश्च कर्मकरणाः॥ चशब्देन सर्वत्रेत्युपांश्विति चानुकृष्यते॥ मंत्राः कर्मकरणा
श्चोपांशु प्रयोक्तव्याः। उपांशुत्वस्येदं लक्षणं। करणवदशब्दं मनः प्रयोगउपांश्विति। जपादीनां ष
ण्णां लक्षणमुच्यते। जपमनुच्चारणं विंद्यात् कृत्स्नमर्थमपि तद्भवेत्। अर्थतः कार्यलाभश्चेदर्थ एव कृतो
भवेत्॥ मंत्रमुच्चारयन्नेवमंत्रार्थत्वेन संस्मरेत्। दोषिणं तन्मना भूत्वा स्यादेतदनुमंत्रणं। एतदे
वाभिमंत्रस्य लक्षणं वीक्षणाधिकं। अद्भिः संस्पर्शनाधिक्यात्तदेवाप्यायनं स्मृतं। उपस्थानं
तदेवस्यात् प्रणतिस्थानसंयुतं। बाह्यं कार्यं यदेतेषु मंत्रकाले क्रियेत तत्। कर्मणः करणास्ते स्युः
विहितार्थप्रकाशनात्। मंत्रेण कृत्वा मंत्रांते क्रियते कर्म येषु तु। इदं कार्यमनेनेति न कश्चिद्दृश्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मात्रं प्रणवरहितत्वं चेति दर्शयति। आचार्यग्रहणं विकल्पार्थं॥ न न च पूर्वं जपं जपति॥ कोऽसा
इति शेषः पूर्वमिति निनमः प्रवक्ष्य इत्यादिमित्यर्थः॥ अथ सामिधेन्यः प्रवो वाजा अभिद्यवो अग्न आ
याहि वीतये गृणानः ईळेन्यो नमस्यस्तिरो ग्निं दूतं वृणीमहे समिध्यमानो अध्वरे समिधो अ
ग्न आहुतेति द्वे॥ अथ शब्दः ऋचामेव सामिधेनीत्वं दर्शयति। पूर्वसामिधेनीग्रहणं सामिधे
न्याद्यंगानां मध्ये भिंहिंकारः सामिधेन्यादीनामासमनंतरमंगं दर्शयति। तेनं वै भ्वे देवे चारत्र
न्याद्यंगानां मध्ये भिंहिंकारः कर्तव्य इति गम्यते॥ ताएकश्रुति संततिमनुब्रूयात्॥ या
दिग्ध्यानोत्तरकालमभिहिंकारः कर्तव्य इति गम्यते॥ ताएकश्रुति संततिमनुब्रूयात्॥ या
ऐता उक्ता ऋचस्ता एवमनुब्रूयात् इत्यर्थः॥ उदात्तानुदात्तस्वरितानां परः संनिकर्ष एकश्रुत्यं॥
एकश्रुत्यलक्षणमुच्यते उदात्तानुदात्तस्वरितानां येऽभिव्यंजकाः प्रयत्ना आयामविश्रं
भाक्षेपास्तेषामन्यतमस्यैकस्यैवान्यतः संनिकर्षेणा सजातीयप्रयत्नाव्यवधानेनयदु
च्चारणं तदेकश्रुत्यमित्यर्थः॥ स्वरादिमन्त्यं तमोकारं त्रिमात्रं मकारांतं कृत्वोत्तरस्या अ
र्धर्चे वस्येत् संततारदं संततलक्षणं स्वराद्यंतपदयोः छिद्रदेशोपलक्षणार्थं वाद्यं
तोयः स्वरादिः स्वर एव वा केवलः तमोकारं त्रिमात्रं कृत्वा तेन प्रणवेनोत्तरामृचं संधा
यतस्या अर्धर्चे वस्येत्। मकारांतं त्रिमात्रमिति व्युत्क्रमेण योजना समुद्रयस्य त्रिमा

॥७॥

त्रतायाः स्पृष्टत्वात्। अत एवं भवति ओंकारोर्धतृतीमात्रः मकारोर्धमात्र इति त्रिमात्र
त्वं प्रणवस्य उत्तरेव पनोऽनावृत्तिन स्तोमयथा गृह्यते। पः प्रणवेनोत्तरासंधानमा
त्रं विधीयते। तत्संतननमित्युच्यते॥ एतदवसानं॥ सामिधेनीष्वनूच्या[illegible]नोमृचामत्र
र्धर्चे चैवसानस्य पूर्वसूत्रेणैवसिद्धत्वात्। इदानीमवसानविधानमाद्यायामृचि प्रा
पणार्थं अन्यत्र जपादिष्वपीति। उत्तरादानमविप्रमोहे॥ आदानमारंभः विप्रमोहो
विश्लेषः पूर्वस्योच्छ्वासस्याविप्रमोहे उत्तरस्योच्छ्वासमारभेतेत्यर्थः। विप्रमोहे पूर्व
मेवसम्यक्समाप्यादित्यर्थः। अस्मिन्पक्षे इदमेव प्रायश्चित्तं नान्यदिति सूत्रस्य प्रयोज
नं॥ समासो प्रणवेनावसानं॥ अर्थप्राप्तस्य विधानं विहित एवापमर्थो नार्थप्रा
प्त इत्येवमर्थं॥ चतुर्मात्रोवसाने॥ यदवसानं विहितमेव नार्थप्राप्तं तस्मिन्नवसा
ने चतुर्मात्रः प्रणवो न त्रिमात्रः॥ नस्यांतापत्तिः॥ नस्य प्रणवस्य योंतो मकार
स्तस्य वर्णान्तरापत्तिर्वक्ष्यत इत्यर्थः॥ स्पर्शेषु स्ववर्ग्यमुत्तमं॥ स्पर्शेषु परेषु यः
स्पर्शो मकारात्परस्तस्य स्ववर्ग्यमुत्तममापद्यते मकारः। सनिध्मसोतंनर्जं.
यं नेत्यादि निदर्शनं॥ अंतस्थासु तासामनुनासिका॥ रेफस्यानुनासिकत्वासं

॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रीं

नवा घवजाएवौं तस्थागृह्यंते। तासुयायापरांतस्थास्तांतामनुनासिकांमकारः आपद्यते तत

सानुनासिका। पूर्वोउत्तराः अनुस्वाराः एवमंत्रसंयोगः। विद्‌था नि प्रचोदयोंवाजीवाजे घिनिनिदु

र्त्रीनं। रिफोष्मस्वनुस्वारं। एतेषु मकारो नुस्वारमापद्यते। अनुस्वारो नाम ननासिकास्था

नोस्पष्टकरणश्च। अस्य यत्तस्य स्कन्नो तं समिध्यमानो अध्वर इत्यादि॥ त्रिः प्रथमोत्तमे

अन्वाहाध्यर्धकारं। अध्यर्धकारमध्यर्धक्रम्येत्यर्थः। प्रथमोत्तमे ऋचौ त्रिरध्यर्धकारं ब्रू

यात्॥ अध्यर्धानुक्तावस्येदथ ह॥ प्रथमायामेव न ध्यर्धकारं भवति। पूर्वान ध्यर्धानुक्तो

वसाय ततो द्वे ऋचौ ब्रूयात्। द्वे इति वचनमध्यर्धाच तुष्का। मि प्रायं। पूर्वस्मिंनुच्छ्वासे प्रथ

मायामावृत्तौ द्वावर्धर्चौ द्वितीयायामेकश्चेति त्रयोऽर्धर्चा उक्ताः। अस्मिंस्तूच्छ्वासे प्रथमा

यामावृत्तौ द्वावर्धर्चौ द्वितीयायामेकश्चेति त्रयोर्धर्चा उक्ताः। अस्मिंस्तूच्छ्वासे द्वितीयतृ

तीययोरावृत्त्योस्त्रयोर्धर्चाः उत्तरस्या ऋच एकोर्धर्च इत्येवं चत्वारोर्धर्चा विभक्ता भवे

युः। अध्यर्धकारविधेः उत्तरया संधानाविरोधादिति। अथ शब्दोस्य सूत्रस्य अन्यथा

र्थप्रतिभासनिवृत्त्यर्थः॥ द्वे प्रथममुत्तमस्यां मध्यर्धां पूर्वेण संधानाविरोधादुत्तमा

यामेवं भवति। अथ शब्दश्च पूर्ववत्॥ ताः पंचदशाभ्यस्ताभिः॥ एकादशानामनूच्या

था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माद्यंतयोस्त्रिरभ्यासे कृते ताभ्यस्ताभिः सह पंचदशो भवंतीत्यर्थः। प्राप्त एवायमर्थः। त्र
स्य वचनस्येदं प्रयोजनं सर्वत्राभ्यस्ताभिः सह विहितसंख्यापूरणं कर्तव्यमित्येवमर्थं नि॥ एतेन
शास्त्रयाज्यानिगदानुवचनाभिष्टवनसंस्तवनानि। शंसत्यादिशब्दचोदितानि शास्त्राणी
नि भवंति। एतेनेति सामिधेन्यनुवचनमुच्यते। शास्त्राणि निचतत्र तत्र विहितानि तेषां
धर्मापेक्षा नास्ति। नत्वैतेन तानीत्युक्ते एतद्धार्मिकाणि तानीति गम्यते। अनेन प्रकारेण ते
षां सामिधेनीधर्मा इति देशोक्तो भवति। सर्वधर्मप्राप्तौ कतिपयधर्मनिषेधार्थमाह॥
॥८॥ नत्वन्यत्राध्वर्युप्रकारं नजपः प्रागभिहिंकारात् न अभिहिंकाराभ्यासाव बहुषु प्रकृत्या॥
अन्यत्रेत्येतावदनुवर्तते तस्य सामिधेनीभ्योऽन्यत्रेत्यर्थः। अतः पित्र्यायामभिहिंकारः ॥८॥
सिद्धो भवति। अभ्यासनिवृत्त्यर्थं नत्वेवं ताग्रहणं करिष्यति। तेनाभ्यासो भवति। प्रकृ न
त्येति शब्दोऽभ्यासेन बहुष्वपि पुरीष्यासोऽग्नय इत्येवमादिषु तयोरभावं दर्शयति॥
नावच्छेदादौ॥ अवच्छेदो नाम यत्र शाखादिषु मध्ये समाप्यावस्येदिति। एवमादिशब्देरव
सानं विहितं समाप्य प्रणवेनेत्येवमादिषु सोऽवच्छेदस्तत्रापि तौ न स्तः॥ शास्त्रे धेन होत्र
काणामभिहिंकारः॥ अस्मिं शास्त्रे मुख्यवर्जिताच्छादशर्त्विजो होत्रका इत्युच्यंते॥ नस

(18)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सवात्रयोर्वाते नग्राबस्कतोभिहिंकारः सिध्योभवति॥ सामिधेनीनामुत्तमेन प्रणवेनाग्नेमहां असि ब्राह्मणभारतेति निगदेवसाय॥२॥ यजमानस्यार्षेयान्प्रवृणीते यावंतः स्युः॥ प्रणवेन निगदं संधाय निगदेन स्येदित्यर्थः। तत्रावसायार्षेयान्प्रवृणीते यावंतो यजमानस्य ते भवंति ते च प्रवराम्नाये व्याख्याताः॥ परं परं प्रथमं॥ अस्येमे आर्षेयाः स्युः ततः अयं परः अयमपरः इत्येवमादिस्मृत्यनुसारेण प्रवराम्नाय एवं वरणप्रकारः पठितः स एवेदानीमियं तीव रित्तव्याहृत्यंवरितव्या इति विधानमन्यस्येत्यजातत्र्यानुष्यायणार्थं॥ पौरोहित्या आजविश्वांराजपश्चाराज्ञां॥ मानवैल पौरूरवसेत्येवं वा पौरोहित्यान्वा॥ सैवर्षीणां मानवेति संशये॥ अतो नसंशये वत्रयाणां वर्णानां मानवेत्ययं शब्दः प्रवरो भवेत्॥ देवेध्मोमान्विध्म ऋषिष्टुतो विप्रानुमदितः कविशस्तो ब्रह्मसंशितो घृताहवनः प्रणीर्यज्ञानां रथीरध्वराणामतूर्तो होता तूर्णिर्हव्यवाळित्यवसायास्या त्वं जुहूर्देवानां चमसो देवपानो अरा इवाग्ने नेमिर्देवांस्त्वं परिभूरस्या वह देवान्यजमानायेति प्रतिपद्य देवता द्वितीययाविभक्त्या देशमादेशमानहेत्यादि श्रावयं॥ निगदेवसाये इति निगद इति सप्तमीनिर्देशात्सर्वापरिभूतो निगदो न परिसमाप्त इति गम्यते। अतः प्रवरोपितस्येयरोषः। छवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्राम्नाये भारतशब्दानंतरमसावसावितिप्रवरप्रकृतेः पठितत्वाच्च संबुद्धिसामा
नाधिकरण्याच्चादेवेध्मरति निवित्पदनिगदश्चतुर्दशानि निवित्पदानि परिभूरसीत्येव
मंतानि। आवह देवान्यजमानायेत्यादिः कृपजायजेत्यंतः आवाहननिगदः सामि
धेन्यादय एते मंत्राः आहवनीयाभिधायिनः। तत्र भारतेत्यवस्येत्। प्रवरांते च नि
वित्पदानामेकादशानां चतुर्दशानावाहननिगदं सधाययजमानायेत्यवस्येत्। प्रति
पद्यावसायेत्यध्याहारात्। प्रतिपद्येति वचनमस्यवाक्यस्य प्रतिपत्तिसंज्ञाकरणा
र्थं। तेन पित्र्यायां प्रतिपत्त्यंतरविधान एतन्नभवति। तत्राग्निं त्वा देवतावक्ष्यमाणा।
द्वितीययाविभक्त्यादिशयानंतरमावाहेत्यावाहयति। आवहशब्दस्यादिं प्लावयन्
द्वितीयाविधानं सर्वार्थं अत्र पाठादेव द्वितीयासिद्धेरिति तेन देवतामादिस्य प्रणुयो
घजेच्चेत्यत्र द्वितीयैव भवति। विभक्त्यंतरविधाने तु दनदेव भवति। आवह देवान्हो
त्राया वह आवह जातवेद इति एते प्लुति प्लुतावसाने नस्तः॥ अग्निमावहेति तु प्रथम
देवतां॥ प्रथमदेवतायामयं विशेषः। तु शब्देन यष्टव्यदेवतावाहनशब्दयोर्मध्ये
अग्नेःशब्दं श्रयात्॥ अग्निं सोमानित्याज्यभागौ॥ यागयोरियमाख्या। तत्संबंधात्तयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रपीति॥ अग्निमग्नीषोमाविति पौर्णमास्यां॥ विशेषाभावात्सोमयाजिनोऽसोमयाजिनश्च
प्रधानदेवते एते॥ अग्नीषोमयोः स्थाने इंद्राग्नी अमावास्यायामसंनयतः॥ पौर्णमास्याः प्र
धमाम्नानात्सैव प्रथमं प्रयोज्या। स्थानशब्दः पौर्णमास्याधर्माणां प्रथमसंबंधं दर्शय
ति। प्राप्तानविशेषेपि प्रयोगावस्थायां विशेषग्रहणादिति। तेनेदं बोधितं भवति। अ
समाम्नानानामसति चोदनालिंगविशेषे पौर्णमासमेव तंत्रमिति। दधिपयोभ्यां या
गं कुर्वन्संनयन्नित्युच्यते। यो न संनयति तस्येयमिंद्राग्नी द्वितीया॥ इंद्रं महेंद्रं वा संनयतः॥
संनयतोमावास्यायामिंद्रं महेंद्रं वा अग्नीषोमस्थाने आवाहयेत्॥ अंतरेण हविषी विष्णुमुपांश्वै
तरेयिणः॥ ऐतरेयिणः शाखाविशेषाध्यायिनः। त एवमुपांशुयागमुभयोरपि पर्वणोरंतरेण
हविषी इच्छंति॥ अग्नीषोमीयं पौर्णमास्यां वैष्णवममावास्यायामेके नेके केचन॥ उभयोरपि प
र्वणोः केचनोपांशुयागमेके नेच्छंति॥ अन्येषाममप्युपांशूनां नामाग्रह स्वाहा यादृप्रिपाधा
मानीदं हविर्महोज्यायस्त्वस्त्वैः॥ अन्येषाममपीति पिश्याकीनामगोपांशूनां संग्रहार्थं आवा
हनादि चतुर्थ्युनिगदेषूयान्युपांशुयाज संबंधानि षट्पदान्यावाहनादीनि तेषामुच्चैरिति सं
ज्ञामात्रं विधीयते। तत्र स्वराण्युपांशोरुच्चानीत्यनेन सर्वेषामुच्चसंज्ञानां तत्र स्वरो विधी
यते॥ येन्येतद्वचनाः परोक्षात्तानुपांशूच्चैर्वा॥ येन्यत्र इति सर्वनाम्नः संनिहितविषयत्वात्तेष्वे
व निगदेष्विति गम्यते। तद्वचनाः उपांशुयागवचनाः परोक्षास्ते येषां पदांतरसंनिधानादेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥

विशेषनिष्ठतावसीयते न स्वतः। अनुषतादयः क्रियावचना इत्यर्थः। तेषामुपांशुत्वं प्रा
प्तमनूद्य उच्चैः संज्ञा विकल्पेन विधीयते॥ प्रत्यक्षमुपांशु॥ यागं प्रति यच्चोदितं देवतानाम
धेयं प्रत्यक्षमित्युच्यते। तस्य प्राप्तमुपांशुत्वं नियमार्थं विधीयते॥ तस्य चोपांशुत्वे भ
वेत्तु उपांशुदेवतायाः प्राथम्येपि प्रथमदेवतायाः संबंधिनोग्निशब्दः आवाहने स्विष्ट
कृन्निगदयोर्न तस्याप्रीति। अत्र किंचिदुच्यते। उपांशु यष्टव्यमिति वचनादुपांशुत्वं
यागधर्मतयावगम्यमानं तत्रासंभवात्तानर्थक्यात्तदंगन्यायेन तत्संबंधिनः शब्दा
न्यपि गच्छति। तत्रावाहनादीनामागुरादीनां च होतायक्षदित्यस्य चोपांशुत्वं नि
वर्त्यते तत्र स्वरोनुक्तातः परोक्षाणामनुषतादीनां विकल्पेन तत्र स्वरोनुक्तातः उक्तः।
प्रत्यक्षस्य विशिष्टवादेशादीनां चोपांशुत्वे नियमादन्यस्य सर्वस्य तत्र स्वरे प्राप्ते
याज्यानुवाक्ययोरागूरादिभिः प्राप्तसंतानविधानादुपांशुत्वमेवशिष्टं॥ प्रति
चोदनमावाहनं॥ चोदनां चोदनां प्रतीति प्रतिचोदनं। चोदना देवताचोदना। यावत्यो दे
वताश्चोदितास्तावत्यावाहनानि भिन्नानीत्यर्थः। प्रत्यावाहनमुच्छ्वासनिश्वाससिध्यर्थं
भेदसाधनं॥ सर्वाश्चादित्यस्य सकृदेकप्रदानाः॥ यत्र बहूनि हवींषि निरेकया याज्यया बह्वी
भ्यो देवताभ्यो युगपद्यागाः क्रियन्ते त एकप्रदाना यागाः। तत्संबंधादेवता अप्येकप्रदाना इ

॥१०॥

20

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्सुच्यंते। सर्वा इति वचनं सर्वासां पृथगादेशार्थं। आदिश्यवचनं सर्वा आदिश्यं ते आवह
शब्दप्रयोगार्थं। सकृद्वचनमंतेपि सकृदेव वक्तव्यो न यावद्देवतमित्येवमर्थं॥ तथोत्तरश्रुति
गमेषेकामिव संस्कृयात्॥ एकामिवेति वचनं यथैकस्या देवतायाः पुरस्तात्स्वाहायाद्दरा
दौ अनुषतादयश्चैकवचनेन तथैतास्वपीति॥ समानां देवतां समानार्थां॥ निगमेषेका
मिव संस्कृयादित्यत्रापि संबध्यते विशेषाग्रहणात्प्रयोजनवत्वात्संप्रदायाच्च। समाना
पित्येकशब्दामित्यर्थः। समानामित्येकप्रयोजनार्थामित्यर्थः॥ अव्यवहितां सकृन्निगमे
षु॥ अव्यवहितां अन्यया देवतया निगमेषु सकृद्ब्रूयात्। एकवचनेनैव॥ ओष्ठा त्वाव
पिकासु देवाँ आज्यपाँ आवहाग्निं होत्राया वह स्वं महिमानमावहावह जातवेदः सुयज्ञाय
जेत्यावापस्य यथास्थितमूर्ध्वजानुरुपविश्योदर्व्ये देव्युघृतस्य निमूलो शादेशं कुर्याद् दर्विनी
तास्यां तरिक्षात्मा छेत्सोरिदमहमग्निना देवेन देवतयाग्निवता स्तोमेन रथंतरेण सा
म्नागायत्रेण छंदसाग्निष्टोमेन यज्ञेन वषट्कारेण वज्रेणायोस्मां द्वेष्टि यं च वयं द्विष्मस्त
स्तं हन्मीति॥ आवापिका आवापयोग्या प्रधानदेवता इत्यर्थः। तासकृतावाहना सकृदेवा
नाज्यपानानाहयेत्। स्विष्टकृतं चापाठो। नुनासिकलोपायनकारलोपायच। होत्राया
वहशब्दयोः स्विष्टकृदावाहनप्रयोगाय च। किंच। पठितावाहनानां पाठादेवोत्तरेष्वपिनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गमेषु निगमनसिद्धिर्लक्ष्यतरस्येवमर्थः। आज्यपाः प्रयाजानुयाजदेवताः आग्निं होत्राया वहत्वं
महिमानमावहेत्से तावाग्निर्विहरहत्वावाहनार्थं। आवहजातवेद इत्यादिस्क्रयज्ञायजेत्स्वं तोनिगद
त्रोषः आवाहप्रवचनं स्क्रयज्ञायजोनस्य आवाहननिगदलाय। सामिधेन्यर्थं यथास्थितस्तथोर्ध्व
जानुरूपविश्यउदग्ग्रदव्युह्यवेद्यां स्तीर्णानि तृणानि वेद्याम्नो प्रादेशं कुर्यादिति मर्ता तस्यां तरि
क्षान्माछेत्सीरिति मंत्रेण॥ आश्रावयिष्यंतमनुमंत्रयेताश्रावय यतं देवेभ्य आश्रावयमां मनुष्येपु
कीर्त्यै यशसे ब्रह्मवर्चसायेति प्रवृणानं देवसवितरेतं त्वावृणतेग्निं होत्राय सहपित्रा वैश्वान
रेण द्यावापृथिवीमां पाता मग्निर्होताहं मानुषइति मानुषइत्यध्वर्योः श्रुत्वोदायुषा स्वायुषोदोषधी ॥११॥
नां रसे। नोत्सर्जन्यस्वधामभिः उदस्थाम मर्त्तां अन्वित्युत्तिष्ठत॥ अध्वर्युग्रहणमुत्तरार्थं॥ षष्टि
॥१२॥ श्चाध्वर्यो नवतिश्च पाशाः अग्निं होतारमंतरा विचृत्ताः सिनं निपाकमतिधीर एतीत्युत्थाय॥ ब्रूया पंथा
दिति शेषः। नायमुत्थानमंत्रः पूर्वेणैव निरपेक्षत्वात्। अनंतरं द्वयोर्मंत्रसंज्ञकः॥ केन स्पृष्टो होतान्वे
मन्वेमि होते त्वभिक्रम्यांसेध्वर्युमन्वारभेत पार्श्वस्थेन नैं पाणिना॥ अत्राध्वर्युग्रहणे तत्रप्रयोजनं
मभिक्रमणान्वारंभणेध्वर्योरेव कुर्यान्न प्रतिप्रस्थातुरित्येके। अनुवादः संधिरं संस्तास्मिंदेशे
ध्वर्युमन्वारभेत पार्श्वस्थेन पाणिना। पार्श्वेनातिष्ठतीति पार्श्वस्थः कनिष्ठिकाप्रदेशेन स्थि
तः नन्यकूनोत्तानरत्यर्थः। तेनान्वारभेताध्वर्युं॥ आग्नीध्रमंकदेशेन सव्येन वा॥ सव्येन पाणिना
पार्श्वस्थेनांसएवांकेनउरूणावा॥ इंद्रमन्वारभामहे होतः सूर्यपुरोहितं। येनायंनुत्तमं स्वर्देवाज्ञं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गिरसो दिवमिति ॥ उभयोः साधारणो मंत्रः । अतो नावर्तते नोपतेच ॥ संमार्गतृणैस्त्रिरभ्यात्मं
मुखं संमृज्जीत संमार्गोसि सं मां प्रजया पशुभिर्मृड्ढीति ॥ इध्मसंनहनानि संमार्गशब्देनोच्यंते ।
अग्निसंमार्जनसाधनत्वात् तेषां तैस्तृणैरभ्यात्मं मुखं संमृज्जीत । तृणैरिति वचनात् तृणैर्हृतैरेव
तैः संमृज्जीत न ग्रंथिभिः हृतैः पात्रांभृतैर्वेति गम्यते । अभ्यात्ममात्माभिमुखं पाणितलमवागपवर्गं
च संमार्जनमिति ॥ सकृन्मंत्रेण द्विस्तूष्णीं सर्वत्रैवं कर्मावृत्तौ ॥ सकृन्मंत्रेण द्विस्तूष्णीमित्येतत्स
र्वत्र भवत्येवंप्रकारस्य कर्मण आवृत्तौ सत्यामिति । एवंप्रकारशब्देन संस्कारकर्मत्वमुच्यते ।
एतदुक्तं भवति । यत्र संस्कारकर्मणस्त्रिरावृत्तिर्विधीयते । तत्र सकृन्मंत्रेण द्विस्तूष्णीमिति । न
प्रधानकर्मणि ॥ स्पृष्ट्वोदकं होतृषदनमभिमंत्रयेताहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद
योस्मत्पाकतर इति ॥ होतृषदनमपरेण स्थित्वा प्राङ्मुखोभिमंत्रयेत । इदमुदकोपस्पर्शनं प्र
योगं । अग्निसंमार्जनतृणैरात्मनो मुखसंमार्जनात् आत्मनो यदौस्यत छौत्यर्थत्वेनास्य दृष्टार्थ
त्वं भवति । अंगुष्ठोपकनिष्ठिकाभ्यां होतृषदनात्तृणं प्रत्यग्दक्षिणा निरस्येन्निरस्तः परावसुरि
तीदमहमर्वावसोः सदने सीदामीत्युपविशेद्दक्षिणोत्तरिणोपस्थेन ॥ दक्षिणं चेत् उत्तरं चेत
द्दानुपस्थो दक्षिणोत्तरी तेनोपविशेत् ॥ एतेन निरसनोपवेशने सर्वासनेषु सर्वेषामहरहः प्र
धर्मोपवेशने पिसमाने ॥ एते इति प्रकारमंत्रविशिष्टयोर्ग्रहणार्थं । ते च सर्वेषां सर्वासनेषु
प्रथमोपवेशने भवतः । न द्वितीयादिप्रयोग इत्येकोर्थः । समाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्यासनेऽहर्गणेषु ग्रहर हः प्रथमोपवेशनेन भवतः॥ अयमपरोर्थः॥ समाने पिस्थाने प्रयोगा वृत्तौ पुनः पुनरावर्तते प्रवर्ग्यादिषु अयं चापरोपि शब्दाल्लभ्यते॥ अस्य विधेर्दर्शपूर्णमास प्रकरणे पठितत्वात्तदतिदिष्टेष्वेष्टिपशुसोमेषु भवतो नाग्निहोत्रादिष्विति॥ अंकधारणं तु भवत्येव॥ द्विरिति गोतमः॥ अस्याचार्यस्य द्विः द्वितीयेपि प्रयोगे भवतीत्यभिप्रायः॥३॥ ब्रह्मौदने प्राशिष्यमाणेग्न्याधेये ब्रह्मा॥ द्विरित्यनुवर्तते॥ क्रियमाणस्य कर्मणो दक्षिणतः उपविष्टः सन्पुनर्ब्रह्मौदनप्राशनकाले द्वितीयेन निरसनोपवेशने कुर्यात्॥ अग्न्याधेये ब्र ह्मौदने द्वितीयविधानसामर्थ्यादेव ई प्रि ... पशुसोमेष्वन्यत्रापि ब्रह्मौदने तत्र नैवं क र्तव्यमिति॥ बहिष्पवमानात्प्रसर्पत्सु सोमे॥ आहवनीयस्य दक्षिणत उपविष्टः सन्बहिष्प वमानं गत्वा ततः प्रत्येत्य पूर्वासने पुनः कुर्यात्॥ सोमग्रहणं सर्वेषु सोमेषु प्रापणार्थं इतर था धानाधिकारात्तत्संबंध एव सोमे स्यान्न सर्वसोमेष्विति॥ प्रसर्प्य होता॥ पश्चार्थ मुपविष्ट एवासने सदः प्रसर्पणं कृत्वा तत्रैव पुनः कुर्यात्॥ होतृग्रहणं ब्रह्माधिकारनिवृ त्त्यर्थं॥ स्रुगाप्यापने पशौ॥ स्वाहाकृत्यर्थे स्रुगाप्यापने पुनः कुर्यात्॥ न पत्नीसांयाजिके॥ पत्नीसंयाजार्थमुपवेशने नैव कुर्यात्॥ नान्यत्र होतुरिति कौत्सः॥ होतुरन्येषामेते न भवत इति कौत्सो मन्यते॥ उपविश्यैव बर्हिः स्वासस्थं त्वा ध्यासदयामिति॥ उपविश्या

॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंतरं ब्रूयादित्यर्थः॥ अभिहिंषहोतः प्रतरां बर्हिष ऊर्वेति जानुशिरसा बर्हिरुपस्पृश्यात ऊर्ध्वं जपे
त॥ जानुशिरोजान्वग्रं। अतऊर्ध्वग्रहणमुपस्पर्शात्तो न जपः स्यादिति। तेनान्यत्रैवं रूपे शब्दे सति कुर्वन्ने
व कुर्यादितिगम्यते। अरणी संस्पृश्य मंथयेदित्यादिषु॥ भूपतये नमो भुवनपतये नमो भूतानांपतये
नमो भूतये नमः प्राणं प्रपद्येपानं प्रपद्ये व्यानं प्रपद्ये वाचं प्रपद्ये चक्षुः प्रपद्ये श्रोत्रं प्रपद्ये मनः प्रपद्य
आत्मानं प्रपद्ये गायत्रीं प्रपद्ये त्रिष्टुभं प्रपद्ये जगतीं प्रपद्ये नुष्टुभं प्रपद्ये छंदांसि प्रपद्ये सूर्यो नो दिव
स्पातु नमो महद्भ्यो नमो अर्भकेभ्यो विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यन्निषद्य। इह होता निषदायजीयान्तस्त्वदद्य वा
चः प्रथमं मसीयेति समाप्य। प्रदीप्तहृदये खुचावाघारयेन्निगदेन। समाप्ते प्रदीप्तेद्ध इत्युभयस्य स्रुगादा
पनावसर प्रदर्शनार्थत्वादनुपसमाप्तेरपि प्रदीप्त एवेतिगम्यते॥ अनेन निगदेन आघारयेदध्व
र्युः। अग्निर्होतावेत्वग्ने होत्रं वेत्तु प्रावित्रं साधु ते यजमान देवता योऽग्निमित्यवसाय होतारम
रथाइतिजपेत॥ अवसायेतिवचनं निगदमध्ये उच्छ्वासलाभार्थं जपेदितिनिगदमध्ये उपांशुत्व
लाभाय। अथ समापये छन्नवतीमध्वर्यो स्रुचमास्यस्व देवयुवं विश्ववारे ईडामहे देवां ईडेन्यां
नमस्याम नमस्यान्यजाम यज्ञियानिति। अथेतिवचनमत्राप्युच्छ्वासलाभार्थं समाप्तिवचनम
ग्निर्होतेत्यत्रैव यानि स्यंतस्याएकनिगदत्वसूचनार्थं समाप्तेस्मिन्निगदे ध्वर्युराश्रावयतीति अध्वर्युके
मेविधानं प्रत्याश्रावणस्येदं निमित्तमिति ज्ञापनार्थं समाप्तिवचनमाश्रावणे कृतेपि समाप्त एव

25

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निगदे प्रत्याश्रवणं कुर्यादित्येवमर्थं। प्रत्याश्रावयेदाग्नीध्र उत्करे देशे तिष्ठन्स्फ्यमिध्मसं
नहनानीत्यादाय दक्षिणामुख इति। शाट्यायनं क्रमस्तु श्रौषडित्योकारं प्लावयन्॥३॥ शाट्या
यनग्रहणं विकल्पार्थं। अतः आश्रुखत्वमपि लभ्यते। प्लावयन्नु तं कुर्वन्नित्यर्थः॥४॥ प्रया
जैश्चरंति। वक्ष्यमाणलक्षणा यागाः प्रयाजा इत्युच्यंते। तैश्चरंति यजंतीत्यर्थः॥ पंचैते भ
वंति। पंचवचनं नराशंसः तनूनपाद्वा। ग्रामुष्यायणस्यापि पंचैव भवंति न षडित्येवमर्थं॥ ए
कैकं प्रेषितो यजति। न सकृत्प्रेषितः सर्वान्यजति। आग्नेयोज्यादिरनुयाजवर्जं सर्वत्र सर्वा
सामनुयाजादिवर्जितानां याज्यानामादावागूर्भवति। केयमागूरित्याह॥ ये यजामह इत्या
गूः वषट्कारोंत्यः सर्वत्र। अनुयाजानामपीति सर्वत्रवचनं॥ उच्चैस्तरां वलीयान्याज्यायाः॥
अत्रोच्चैस्तरत्वमेकयमाधिक्यं वलीयस्त्वं वक्तृतरोच्चारणमेतदुभयं याज्याया एव। तयोरादी
प्लावयेत्। तयोरागूर्वषट्कारयोराद्योः प्लुतिः कार्या॥ याज्यांते च॥ प्लावयेदिति शेषः॥ विविच्य
संध्यक्षराणामकारं न चेद्द्विवचनो व्यंजनांतो वा॥ न चेत्प्रगृह्य इति पठितव्ये न चेद्द्विवचनम् इति
प्रमादपाठः॥ ऋगंते यान्यप्रगृह्यानि संध्यक्षराणि तानि विविच्याकारमेव प्लावयेत् इति।
एकारैकारयोः आ इ इति। ओकारौकारयोः आ उ इत्येवं विविच्य प्लुतिः कार्या॥ ओकारस्य तु
प्रगृह्यसंज्ञाया अनित्यत्वान्नित्यानित्यसंयोगविरोधात्तस्य सर्वदापि विविच्यैव प्लावनं कर्तव्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यंजनांतो वा॥ व्यंजनांतानां संध्यक्षराणां सर्वदा स्वरूपेणैव श्रुतिः कार्या न विवेकः कर्तव्यः॥ अ
धिश्रियं शुक्रपिंशं दधाने इ वौषट् कारेण संधीयमाने रिष्यते॥ पिबा सोममभि यमुग्र तर्द इ
ति निदर्शनं। इतरश्च रेफी। इतरः अवर्णोपधः स च रेफी संज्ञी चेद् द्विपते महो षो वर्जमितरो
यथोक्तमित्यत्र रेफी संज्ञाधिगंतव्या॥ उ तस्यं चमसं नवमित्यादि निदर्शनं। लुप्यते रेफी। अ
वर्णोपधो यो विसर्जनीयो रेफि संज्ञश्च न भवति स लुप्यते एव वषट् कार संधौ। अर्वाङ् हि
सोमकामं त्वाहुरिति निदर्शनं। प्रथमः स्वं तृतीयं। वर्णानां यो यः प्रथमः स स स्वं तृतीयमाप
द्यते। नित्यं मकारे। अंतस्थासु तां तामित्यनेनोक्तमित्यर्थः। ये३ यजामहे समिधः समिधो अ
ग्न आज्यस्य व्यंतु वौष ळिति वषट् कारः। वौषट् शब्दो वषट् कार इत्यर्थः। इति प्रथमः॥ अ
यं प्रथमः प्रयाज इत्यर्थः। वागोजः सह ओजो म यि प्राणापा॥ नाविति वषट्कारमुक्तो ऽ का
नुमंत्रयते॥ सर्वस्यायं विधिरित्यादि इत्येवमर्थावीप्सा। दिवाकीर्त्यो वषट् कारः। यथा रात्रौ न प्रयो
क्तव्य इत्यर्थः॥ किंच वषट् कार संबंधि यत्कर्म तद्ध्वंतरा विरोधे सति दिवैव कर्तव्यमिति। तथा
नुमंत्रणं दिवाकीर्त्यमित्यर्थः। तत्त्वोक्तार्थमेव। एतद्याज्यानिदर्शनं। यदिदं याज्यायाः पुरस्ताद
गूर्त्तस्याश्चादौ याज्यांते श्रुतिः स्त्तनो ऽनुमंत्रणं इत्येतद्याज्यौ स्वरूपनिदर्शनं। अनुमंत्रणे ऽ स्य
याज्यांतर्भाववचनं तदेतं वाग्यमनार्थं॥ तनूनपादग्न आज्यस्य वेत्विति द्वितीयो ऽन्यत्र वसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंतरं ब्रूयादित्यर्थः॥ अभिहिष होतः प्रतरां बर्हिष द्रुवेति जानुशिरसा बर्हिरुपस्पृश्यात ऊर्ध्वं जपेत॥ जानुशिरोजान्वयं। अत ऊर्ध्वग्रहणमुपस्पर्शातो न जपः स्यादिति। तेनान्यत्रैवं रूपे शब्दे सति कुर्वन्नेव कुर्यादिति गम्यते। अरणी संस्पृश्य मंथयेदित्यादिषु॥ भूपतये नमो भुवनपतये नमो भूतानां पतये नमो भूतये नमः प्राणं प्रपद्ये पानं प्रपद्ये व्यानं प्रपद्ये वाचं प्रपद्ये चक्षुः प्रपद्ये श्रोत्रं प्रपद्ये मनः प्रपद्य आत्मानं प्रपद्ये गायत्रीं प्रपद्ये त्रिष्टुभं प्रपद्ये जगतीं प्रपद्ये नुष्टुभं प्रपद्ये छंदांसि प्रपद्ये सूर्यो नो दिवस्पातु नमो महद्भ्यो नमो अर्भकेभ्यो विश्वे देवाः शास्तन मा यथेह होताधिहोता निषदाय जीयो स्तदध्वा चः प्रथमं मसीयेति समाप्य। प्रदीप्तं इध्मं स्रुचावाघारयेन्निगदेन। समाप्ते प्रदीप्ते इत्युभयस्य स्रुगादापनावसरप्रदर्शनार्थत्वाज्जपसमाप्तेरपि प्रदीप्त एवेति गम्यते॥ अनेन निगदेन आघारयेदध्वर्युः। अग्निर्होतावेत्वग्ने हौत्रं वेत्तु प्रावित्रं साधुते यजमान देवता योअग्निमित्यवसाय होतारमव्रथा इतिजपेत॥ अवसाये तिवचनं निगदमध्ये उच्छ्वासलाभार्थं जपेदिति निगदमध्ये उपांशुत्वलाभाय। अथ समापयेद्धुतवतीमध्वर्युं स्रुचमास्यस्वा देव ध्रुवं विश्ववारे ईळामहे देवां ईळेन्यां नमस्याम नमस्यान्यजाम यज्ञियानिति। अथेति वचनमत्राप्युच्छ्वासलाभार्थं समाप्ति वचनमग्निर्होते त्यत्र यानि संतस्याएकनिगदत्वसूचनार्थं समाप्तेस्मिन्निगदेध्वर्युरा श्रावयति अध्वर्युकर्मविधानं प्रत्याश्रावणस्येदं निमित्तमिति ज्ञापनार्थं समाप्ति वचनमाश्रावणे कृते पि समाप्त एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेनहवींष्यास्विष्टकृतः। सर्वत्राकारोभिविधावेवात्रत्वभिविधौमर्यादायांवाभवत्यध्वर्युव
शात्। अत्रस्विष्टकृन्मध्येनोत्तमेनवा अध्वर्युवशात्प्रयोक्तव्यः। प्रयाजेभ्यउध्वमास्विष्टकृ
तोमध्यमेनप्रयोगः॥ हविर्ग्रहणंस्थानांतरेपिप्रधानहविषांमध्यमस्वरएवेति। उत्तमेनशेषः॥
इन्द्रादिस्विष्टकृदादिवीशंयुवाकांतःशेषइत्युच्यतेसउत्तमेनप्रयोज्यः॥ अग्निर्वृत्राणिजं
घनदितिपूर्वस्याज्यभागस्यानुवाक्यात्वंसोमासिसत्पतिरित्युत्तरस्यजुषाणो अग्निरा
ज्यवेत्वितिपूर्वस्ययाज्याजुषाणःसोमआज्यस्यहविषोवेत्वुत्तरस्यतावाग्नेयौदेशंयजति
तावित्याज्यभागसंप्रत्ययार्थं। आग्नेयेतिदेवतादेशस्यक्रमविधानार्थं। यजतीतिदेवतादे
शस्ययाज्यासंधानार्थंतावाज्यभागसंज्ञकौयागावाग्नेयेअनंतरंद्वितीययाविभक्त्य
देवतामादिश्यादिश्ययाज्यासंधाययजतीत्यर्थः॥ सर्वोश्चानुवाक्यावत्योप्रेषा अन्याअ
न्वायास्याभ्यः। उपाः याः अन्वायातशब्देनानुनिर्वापशब्देनवाचोदिताः ताअन्वायास्याः ता
भ्योन्यायादेवताअनुवाक्यावत्योप्रेषाश्चेतीः सर्वाः आदिश्ययष्टव्याः। अन्वायास्यानामनु
वाक्यारहितानांचसंप्रैषाणामादेशोनकर्तव्यःइत्यर्थः। सर्वग्रहणमाज्यभागयोरपिसंप्रै
षयोरादेशनिवृत्त्यर्थं। सौमिकीभ्यश्चयाअंतरेणवैश्वानरीयंपत्नीसंयाजांश्च। सौमिक्यः
सोमेउत्सन्नाःनसोमेप्रयोज्याअपि। प्रयोत्सन्नानामेवतत्रभवत्वसंभवात्। वैश्वानरीयप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्नी संयाजानां च वद्चोदितानामेव ग्रहणं युक्तं। अत एतस्मिन्न्वेवासने वैश्वानरीयस्य यजतीत्ये
त देवगत्यते पञ्यय ष्टव्यानता आदित्य यष्टव्याइत्यर्थः॥ एतौवात्रै घ्रौ पौर्णमास्यां। थावेतौ पौर्णे
मास्यामाज्यभागौ तौवात्रै घ्रसंज्ञौ भवत इत्यर्थः॥ स निमित्तेयं संज्ञेत्याह। अनुवाक्यालिंगवि
शेषान्नामधेयान्यत्वं ततो विचारः। अनुवाक्यात एव विचारावगमोऽन्यत्वमित्यर्थः॥ नित्ये याज्ये
उक्ते एवेमे सर्वत्र याज्ये॥ नानुवाक्यावदेतयोरन्यत्वमित्यर्थः॥ वृधन्वंतावमावास्यायां अग्निः
प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वयमिति आतो वाग्यमनं। आदितः ७ आरभ्याज्यभागपर्यंतं वा
ग्यमनं भवति। अंतरा च याज्यानुवाक्ये। निगदानुवचनाभिष्टवनशास्त्रजपानां चारभ्यास
माप्तेः। अत्राभिष्टवनसंस्तवनशब्दोऽतिसंस्तवनशब्दः पठितव्यः आरभ्येति वचनमन्यदपि य
याज्यादिभ्यस्तदारभ्यासमाप्ते वाग्यमनसिद्ध्यर्थं। होतुरधिकारात्कर्त्रंतरस्यापि प्रापणार्थं
चेति। अन्यद्यज्ञस्य साधनात्। यज्ञसाधनवचसोऽन्यत्र वाग्यमनं नियम्यते। यज्ञसाधनव
चो नाम यज्ञसंपादनार्थं तद्द्वेषपरिहारार्थं च। आपघातो देवा अवंतु न इति जपेत्॥
आपघेति नियममतिक्रम्येत्यर्थः। अपि वान्यां वैष्णवीं अन्यामपीति वचनं पूर्वोक्ता या अपि
वैष्णवी त्वगतिपत्त्यर्थं॥ ५॥ उक्ता देवतास्तास्तासां याज्यानुवाक्या अग्निर्मूर्द्धा भुवो यज्ञस्या
यमग्निः सहस्त्रिण इति वेदं विष्णुर्विचक्रमे त्रिर्देवः पृथिवीमेष एतां मगनी षोमा सवेदसा युव

मेतानिदिविरोचनानीन्द्राग्नीअवसागतंगीर्भिर्विप्रःप्रमतिमिच्छमानएंडसानसिरयिंद्र
ससाहिषेपुरुहूतशत्रून्महाँइंद्रोयओजसानुवस्त्वमिंद्रब्रह्मणामहानितियधग्नीषो
मीयउपांशुयाजोग्नीषोमायोअघवामान्यंदिवोमातरिश्वाजभारेति।उक्तसंकीर्तनंदेव
ताविधिक्रमस्मरणार्थंतासांयाज्यानुवाक्यावक्ष्यमाणालिंगक्रमाभ्यांयोजनीयाइति।इ
दमपिउक्तसंकीर्तनस्यप्रयोजनं।यत्रदेवताविधायतदनंतरंमंत्रोविधीयंतेतत्रतासांदे
वतानांताएवयाज्यानुवाक्याइतिसावैत्रिकोयंविधिरितिएतत्ज्ञापयितुंअयमग्निरिति
गायत्र्यपियाज्यानंतरमुक्त्वाघान्येवभवति।सातुगायत्रीसामान्याऽदाधानएवभव
ति॥यद्यग्नीषोमीयइतिव्युत्क्रम्यांतेपठनूअसंशयार्थंमुक्तवानाचार्यः॥अथस्विष्टकृत
पिजीहिदेवांउशतोयविष्ठत्यनुवाक्या।अथशब्दःप्रधानानंतरंस्विष्टकृतोयागःस्यान्
वाहनक्रमेणेति।अनुवाक्यावचनंसर्वत्रपूर्वमनुवाक्यापश्चाद्याज्येतिप्रदर्शनार्थं॥
यि३यजामहेग्निंस्विष्टकृतमयाळग्निरित्युक्ताषष्ठ्याविभक्त्यादेवतामादिश्यप्रियाधामा
न्यत्याक्षित्सुपसंतनुपात्॥आगूर्विधानंनिगदावेवरूपांतऋगादाविति।अग्निंस्विष्ट
कृतमितिवचनंअग्निहोत्रीयशब्देनादेशोनस्यादिति।षष्ठीविधानंद्वितीयानिवृत्त्यर्थं।दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वनामादिश्य प्रिया धामानिशब्दमुपसंतनुयात्। अयाडित्शब्दः पूर्वपठित एवोत्तरेणसू
त्रेण स्त तस्यास्तस्या देवतायाः पुरस्तादिति देशरूपेण विधीयते॥ देवताया उपरिष्टाद्द्वि
तीयमानेन प्रिया धामानिशब्देन संधानार्थं प्रिया धामान्ययाळिति सततं पठितं॥ अ
तोत्र प्रतिदेवतमेक एवायाड्शब्दः प्रयोक्तव्यः न द्वितीय इति स्थितं। एवमुत्तरा अयाळ्याळि
ति त्वेवतासां पुरस्तात्। उत्तरासामयं विशेषः अयाड्शब्द एव तासां पुरस्तात्पुरस्तात्त्रयो ज्यो
नाग्निशब्दोपीति॥ एतदुक्तं भवति। प्रथमदेवतायाः पुरस्तादयाळग्निशब्दः उत्तरासामया
ड्शब्द एव सर्वासामुपरिष्टात्प्रिया धामानिशब्दः सर्वे च संतताव क्तव्या इति। आज्यपांतम
नुक्रम्य देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि यक्षत्स्वं महिमानमा
यजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषतां हविरग्ने यदद्य विशो अध्वरस्य हो
तरित्स्यनवानं यजतीति॥ आज्यपांतमिति प्रसिद्धक्रमसंग्रहाद्यावाहनक्रमोत्रापि परिग
ह्यते तेनास्यानित्यानिगमनमिहापि स्यात्। आज्यपांतमेवमुक्त्वा तदनंतरेण प्रिया धामा
निशब्देन यक्षदिति संधाय यथासूत्रमुक्त्वा जुषतां हविरग्ने यदद्येत्यस्य चानुद्रुत्य यजेत्॥ स
र्वत्रानुद्रावः कर्तव्योस्या याज्यायां। प्रब्रूयाद्वा। अर्धर्चे वोच्छ्वसेत्॥ ६॥ प्रदेशिन्याः पर्व
णी उत्तमे अंजयित्वोष्ठयो रभ्यात्मनं निमार्ष्टि। प्रदेशिनी नामांगुली विशेषः। पर्वसंधी उत्तमे

४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रस्यग्रतोह्वेपर्वणी इत्यर्थः॥ अध्वर्युणा तेपर्वणी अंजयित्वा अभ्यात्मं पाणितलं कृत्वा
ओष्ठयोरवागपवर्गं निमार्ष्टि। वाचस्पतिना हुतस्येषे प्राणाय प्राश्नामीत्युत्तरमुत्तरे
मनसस्पतिना ते हुतस्योर्जेपानाय प्राश्नामीत्यरमधरे। अनेनैकस्मिन्नित्यनयोरर्थः
स्पृष्टोदकमंजलिं नेष्टा प्रतिगृह्य सव्ये पाणौ कृत्वा पश्चादस्या उदगंगुलिं पाणिमुपधा
यावांतरेडामवदापयीत। द्विहस्तसंयोगो जलिस्तं कृत्वा तेनेनां गृहीत्वा सव्ये पाणौ कृत्वा
निधायेत्यर्थः॥ अस्या दतीडायाइत्यर्थः॥ या हस्ते वदीयते सा अवांतरेडा अवदापयीता
ध्वर्युं। अंतरेणांगुष्ठंगुली श्वस्वयं द्वितीयमाददीत। अंगुल्यंगुष्ठयोर्मध्येन प्रदेशेन स्व
यमिडाया अवांतरेडामाददीत। अस्याल्पमंगुष्ठेनाभिसंगृह्य प्रस्याहृत्य। प्रस्याल
ब्धांस्पृष्टामध्वर्युणेत्यर्थः॥ अंगुरीलमुष्टिं कृत्वा दक्षिणत इडां परिगृह्यास्य संमितानामु
पहूयते प्राणसंमितां वा। अमुष्टिं कृत्वा अंगुलिभ्यो बहिरंगुष्ठमकृत्वेत्यर्थः॥ सव्ये हस्ते
निहितामिडां दक्षिणहस्तेन गृहीत्वावांतरेडां दक्षिणतः परिगृह्यास्य संमितां प्राणसंमि
तां वेडां कृत्वा तामुपह्वयते। प्राणसंमितां नासिकासंमितामित्यर्थः॥ इडोपहूता सह दि
वा बृहतादित्येनोपास्माइडाह्वयतां सह दिवा बृहतादित्येनेडोपहूता सहांतरिक्षेणवा

मदेव्येन वायुनोपास्मां इळाह्वयतांसह सहांतरिक्षेण वामदेव्येन वायुनेळोपहूतास
ह पृथिव्या रथंतरेणाग्निनोपास्मां इळाह्वयतांसह पृथिव्या रथंतरेणाग्निनाउपहूता
गावः सहाशिर उपमां गावः सहाशिराह्वयंतामुपहूता धेनुः सहऋषभोपमां धेनुः सहऋ
षभा ह्वयतामुपहूता गोघृतप [illegible] घुपमां गौर्घृतपदी ह्वयतामुपहूता दिव्याः सप्तहो
तार उपमां दिव्याः सप्त होतारो ह्वयंतामुपहूतः सखा भक्ष उपमां सखा भक्षो ह्वयता
मुपहूते ळावृष्टिरुपमा मिळावृष्टिर्ह्वयतामित्युपांश्वर्थो ज्ञे ॥ इळोपहूतोपहूते ळोप
स्मां इळा ह्वयतामिळोपहूता ॥ मानवी घृतपदी मैत्रावरुणी ब्रह्म देवकृतमुपहूतं दै
व्या अध्वर्यव उपहूता उपहूता मनुष्याः ॥ य इमं यज्ञमवान्ये च यज्ञपतिं वर्धानुपहूते द्या
वापृथिवी पूर्वजे ऋतावरी देवी देवपुत्रे । उप [illegible] हूतोयं यजमान उत्तरस्यां देवयज्या
यामुपहूतो भूयसि हविष्करण इदं मे देवा हविर्जुषंतामिति तस्मिन्नुपहूत इति । इळो
पहूता सह दिवेत्यादिना तस्मिन्नुपहूत इत्यंतेन उपह्वयते इत्युपांश्वित्यनेन निगदानां
तत्र स्वरत्वाद प्राप्तमुपांशुत्वं विधीयते । तेनैकश्रुत्यमनुपरमेवेति स्थितं । अथो उच्चैरित्य
नेनोत्तरस्य निगदभागस्य तत्र स्वरानपगमः कथ्यते । आप्तत्वं नापूर्वं विधीयते तस्मि

३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नूच्यमानेसंशयस्यात्।निगदमध्येउपांशुत्वमुच्यमानेकिंसर्वस्यनिगदस्याऽऽ
होस्वित्पूर्वस्यभागस्यपरस्यवेति॥अस्मिंस्तूच्यमानेपूर्वस्यैवभागस्योपांशुत्वंविहि
तंभवतिनोत्तरस्यभवतीतिनात्रसंशयः॥पुरामानवीशब्दान्तउपहूताःमनुष्याःदेवी
देवपुत्रेइतित्रीण्यवसानानि।उपहूतौयावांतरेळांप्राश्नीयादिळेभागंजुषस्वनोजि
न्वगाजिन्वार्वतोशपस्पोषस्यशिषेतस्यनोरास्वतस्यनोदास्तस्यास्तेभागमशीम
हि।सर्वात्मानःसर्वतनवःसर्ववीराःसर्वपूरुषाःसर्वपुरुषाइतिवा।उपहूयेत्यनूच्य
मानेहविर्जुषंतामितिनिगदांतस्यात्॥तस्मिन्नुपहूतइत्यवांतरेळाभक्षणमंत्रःस्या
दिळेभागमितिवानयोर्विकल्पार्थोवाशब्दःसर्वपूरुषाःसर्वपुरुषाइतिपदद्वयवि
शिष्टश्चमंत्रइतिएतेशेषास्युः।एतस्मिंस्तूच्यमानेतस्मिन्नुपहूतइत्येवमंतोनि
गदस्यात्।पुरुषाइतिशब्दोनिगदैकदेशस्यात्।वाशब्दश्चमंत्रावयवयववविकू
ल्पार्थएवस्यात्।सर्वपुरुषाइत्यंतइतिशब्दात्।नैतावानेवचमंत्रःस्यादित्येवंस
र्वसमंजसंभवति।होतावांतरेळांभक्षयित्वेळामपिभक्षयेत्।सर्वेचसयजमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाइळांभक्षयेयुः। इळ्ठासर्वेषामितिपशुविभागेदर्शनात्॥ शास्त्रांतरेचयजमानपंचमाइळांभक्षयेयुरितिदर्शनाच्च॥ ७॥ मार्जयित्वानुयाजैश्चरंतिमार्जनमिळाभक्षणांगं॥ पिन्यायामिळाभक्षणाभावेमार्जनस्याप्यभावदर्शनात्॥ भक्षयित्वामार्जने दृष्टश्चोपकारोस्तिशुद्धिर्नामात इळांतकर्मस्वपिमार्जनमस्त्येव॥ नेतदनुयाजांगं। चतुर्धाकरणदक्षिणादानाभ्यांव्यवहितत्वात्॥ पिन्यायामनुयाजसत्तायामपितदभावदर्शनाच्च। अतोमार्जयित्वानुयाजैश्चरंतीतिवचनंचतुर्धाकरणदक्षिणादानयोरनित्यत्वसूचनार्थं॥ तथाह्यनाग्नेयेषुचतुर्धाकरणंनास्ति अंगभूतेषुदक्षिणादानंनास्तीति॥ परिस्तरणेरंजलिमंतर्धायापआसेचयतेतन्मार्जनं॥ आहवनीयस्यपरिस्तरणैः प्रसणार्थेनिष्क्रम्यपुनः। प्रविष्टानांप्रथमप्राप्तत्वात्तेषामासेचयतेपः सहकारिणा॥ देवादयोनुयाजावीतवत्स्यदातास्यएकैकंप्रेषितोयजति। देवादयोदेवशब्दादयइत्यर्थः॥ पुनरनुयाजग्रहणमुत्तरस्यसूत्रस्यप्रयाजानुयाजार्थत्वोपवीतवत्स्यदांतत्वंप्रयाजानुयाजयोर्गुणः स्यात्। तेनुयाजास्त्रयोभवंति। देवान्यजेतिप्रथमसंप्रैषस्यसर्वार्थत्वेप्यपिपुनःप्रेषितएवयजेत्। इमेनुयाजाः। देवंबर्हिर्वसुवनेवसुधेयस्य

६

(36)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेतु। देवो नराशंसो वसुवने वसुधेयस्य वेतु। देवो अग्निः स्विष्टकृत्सुद्रविणा मंद्रः कविः स
त्यमन्मायजी होता होतुर्होतुरायजीयानग्ने यान्देवानयाड्या अपिप्रेर्ये ते होत्रे अमत्स
त। तांससनुषीं होत्रां देवंगमां दिवि देवेषु यज्ञमेरयेमं स्विष्टकृच्चाग्ने होता भूर्वसुवने व
सुधेयस्य नमोवाके वीहीति। अन[illegible]नवा। अमत्सतेत्यत्रावसायानवसाय वाजयेत्॥८॥
सूक्तवाकाय संप्रेषितः इदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाकमुत नमोवाकमृध्यास्म
सूक्तोच्यमग्ने त्वं सूक्तवागसि। उपश्रुती दिवस्पृथिव्योरोमन्वती तेऽस्मिन्यजमान
द्यावापृथिवी स्तां। शंगयी जीरदानू अत्रस्नू अप्रवेदे उरुगव्यूती अभयंकृतौ। वृष्टिद्या
वारीत्यापा शंभुवौ मयोभुवा ऊर्जस्वती पयस्वती सूपचरणा च स्वधिचरणा च तयोरावि
दीत्यवसाय प्रथमया विभक्त्यादित्यदेवतामिदं हविरजुषतावीवृधत महो ज्यायोऽकृते
त्युपसंतनुयात्। असि। स्तां। अभयंकृतौ। विदि। अकृतेति च। अक्राता। मक्रंते त्येवं। यजमा
नस्य नाम नतो। मानुषीः। इत्यवसानानि सर्वाणि निगदे। अत्र तु प्रथमा विधानं द्वितीयानिवृ
त्यर्थं। आविदीत्यत्राऽवसाय प्रथमया विभक्त्यादित्य देवतामिदं हविरित्युपसंतनुयात्।
एवमुत्तराः। उत्तरा अपि देवता आदित्य इदं हविरित्येवमुपसंतनुयात्॥ अक्रातामक्रते

37

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तियथार्थं हि देवतबहुदेवतयोरेवमूहः कर्तव्यः ॥ यथार्थवचनमर्थवशेनाभिधानमित्येवमर्थं
उक्तमुपांशोः ॥ आवह स्वाहेत्युक्तमित्यर्थः ॥ उक्तवचनमस्य निगदस्य पशावपीष्टिवदेव प्र
योगार्थं न सूक्तवाकप्रैषवदजुषतादीनामुपांशुत्वं भवति। आवापिकांतमजुडुस्त देवा आ
ज्य आज्यमजुषंतावीवृधंत महो ज्यायोक्रताग्निर्होत्रेणेदं हविरजुषतावीवृधत महो
ज्यायोकृतास्यामृधेद्धोत्रायां देवंगमायामाशास्ते यं यजमानोसावसावित्यादित्र्यनाम
नीउपांशु संनिधौ गुरोरायुराशास्ते सुप्रजास्त्वमाशास्ते रायस्पोषमाशास्ते सजातवन
स्यामाशास्त उत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते दिव्यं धामाशास्ते विश्वं
प्रियमाशास्ते यदनेन हविषाशास्ते तदस्यात्तदृध्यात्तदस्मै देवा रासंतां तदग्निर्देवो देवेभ्यो
वनते वयमग्नेर्मानुषाः ॥ इष्टं च वित्तं चोभे च नो द्यावापृथिवी अंहसस्पातामिह गतिर्वा
मस्येदं नमो देवेभ्य इति। आवापिकांतमित्यादि इदं नमो देवेभ्य इत्यंतं आवापिकांतमित्ये
तदावापिकदेवताक्रमप्राप्त्यर्थं तेनास्थानिन्यप्यपिनिगद्यते। देवा आज्यपा इति यथासू
त्रं। असावसावित्यत्र यजमाननामनी प्रथमया विभक्त्या निर्दिशेत्। सांव्यवहारिकं नाक्ष
त्रं च ॥ होतुर्गुरुश्चेद्यजमानस्यां तत्संनिधौ उपांशु नामनी ब्रूयात् ॥ २ ॥ शंयुवाकायसंप्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षितस्तच्छंयोरावृणीमह इत्याहानुवाक्यावदन्नगोवां॥ अनुवाक्यावद्वचनमेकश्रु
त्यज्ञापनार्थं॥ अग्नेर्णवामिति प्रणवो निषिध्यते॥ वेदमस्मै प्रयच्छत्यध्वर्युः॥ वेदग्रह
णकालज्ञापनार्थमेतत्सूत्रं अतोध्वर्युणा दत्तं गृह्णीयात्॥ अदत्तेपि स्वयमेव गृह्णीया
त्॥ तं गृह्णीयाद्वेदोसि वेदोविदे पेति। तमिति विस्पष्टार्थं। यदाह्येद ध्यान्तदा तंत्रेण गृह्णी
यादित्यर्थः॥ यदि द्वौ युगपद्ध्यान्त दोहेनमंत्रं ब्रूयात् वरुणप्रघासादिषु। उदापुषेत्येनो
पोत्थायप्रश्वाज्ञाहेपत्यस्योपविश्य सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमित्याज्ये
नयजंति॥ एतेनेति वचनं प्रकृतिविकारभावेपि कृत्स्नस्य मंत्रस्य ज्ञापनार्थं॥ आज्यवच
नं यत्राज्येन सोम इज्यते तत्रैते याज्यानुवाक्ये भवतः॥ नान्यहविष्के सोम इति॥ यजंतीति
वचनं यागएव तासां देवतानां निगमेष्वनुकृत्तिरिति। आप्यायस्व समेतु ते संते पयांसि
समु यंतु वाजा इह त्वष्टारमग्रियं तंन स्तुरीपमध्पोषयित्नु देवानां पत्नीरुशतीरवंतु
न इति है अग्निर्होता गृहपतिः सराजा हव्यवाळग्निरजरः पितान इति पत्नीसंयाजाः
इदं संज्ञाविधानार्थं। अथप्रजाकामो राकां सिनीवालीं कुहूमिति प्राग्गृहपतेर्यजेत्॥
अथशब्दः पक्षांतरपरिग्रहार्थः। अथचेद्यजमानः प्रजाकामस्यात् दैवेतादेवतायजे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समुच्चयं दर्शयति॥ राकामहं सिनीवालीं कुहू
तिति। प्राग्गृहपतेरिति देशविधानेन पूर्वाभिः समुच्चयं दर्शयति॥ राकामहं सिनीवालीं कुहू
मिति द्वे द्वे याज्यानुवाक्ये। याज्यानुवाक्यावचनं प्रजाकामो यजेतेत्यनेन यजमाने संनि
हिते पि होतैव कर्तास्यादिति। याज्यानुवाक्ययोर्होतृकर्तृत्वमन्यतः प्रसिद्धमिति। कुहूमिति प्रती
केन गृहीतेपि स्वयमेव पठति। कुहूमहं सुवृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि॥ सा
नो ददातु श्रवणं पितॄणां तस्यै ते देवि हविषा विधेम॥ कुहूर्देवानाममृतस्य पत्नी हव्या नो अ
स्य हविषः शृणोतु सं दाशुषे किरतु भूरि वामं रायस्पोषं यजमाने दधात्विति। आज्यं पाणितलेव
दाय दापयीते लामुपहूय सर्वा प्राश्नीयात्॥ पर्वा जना द्युपक्षा नां तं कार्यं नो आवान्तरेडां। पाणि
तलस्थमाज्यमिडेत्युच्यते। ततः सर्वा प्राश्नीयादित्युच्यते॥ शंयुवाको भवेन्न वा॥ आज्येडा
याऊर्ध्वं शंयुवाको भवति न भवतीत्यध्वर्यूणां संस्थाप्रकाराः सन्तीति तत्सूचनार्थमेतत्सू
त्रं॥ यदि स्याद्धोतापि तथा कुर्यादित्येवमर्थो॥ १०॥ वेदं पत्न्यै प्रदाय वाचयेद्धोताध्वर्युर्वा वेदो
सि वित्तिरसि विदेय कर्मासि करणमसि क्रियासं सनिरसि सनितासि सनेयं घृतवन्तं कुला
यिनं रायस्पोषं सहस्त्रिणं वेदो ददातु वाजिनं॥ यं बहव उपजीवन्ति यो जनानामसद्वशी। तं वि
दिय प्रजां विदेय कामाय त्वेति॥ पत्[illegible] त्न्यै वेदं प्रदाय तां वाचयति होताध्वर्युर्वा वेदोसीत्यादि

पोतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामाय त्वेत्येवमंतंमंत्रं। वाचन मंत्रस्योच्चैः प्रयोगो यथोत्सिध्यति॥ कार्यं तु लिंगजनितमेव। वे
दशिरसा नाभिदेशमालभेत प्रजाकामा चेत्॥ यदि पत्नी प्रजा मे स्यादिति कामयेत तदा वेद
स्य जानुसदृशेन प्रदेशेन पत्नी स्वनाभिमालभेत॥ कामाभावेपि वाचनं भवत्येव। अथास्या यो
क्त्रं विचृतेत प्र त्वा मुंचामि वरुणस्य पाशादिति अयेति सर्वं थार्थः॥ कामाभावे वाचनानंतरं यो
क्त्र विमोकः स्यान्न त्वालंभनमपीति॥ अस्या इति योक्त्र विमोचनं होतृकर्तृकमित्यवगंतिद शेय
ति॥ तत्तस्य गार्हपत्याद्द्विगुणं प्राक्पात्रं निधाय तस्योपरिष्टादुदगग्राणि वेदतृणानि क
रोति॥ तद्योक्त्रं द्विगुणं कृत्वा गार्हपत्यात्तस्य कुशा कुपात्रं प्राङ् मूलाग्रदेशमित्यर्थः॥ तं नि
दध्यात्॥ योक्त्रस्य मूलप्रदेशः पाशः॥ पाशशब्दोत्र मूलाग्रयोः प्रदर्शनार्थः। अस्य यो
क्त्रस्योपरिष्टाद्वेदतृणान्युदगग्राणि निदध्यात्॥ पुरस्तात्पूर्णपात्रं संश्लिष्टं वेदतृणैः॥
तृणेभ्यः पुरस्तात्तृणैः संश्लिष्टं पूर्णपात्रं निदध्यात्॥ अभिमृश्य वाचयेत्पूर्णमसि पू
र्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूया अक्षिति
रसि मा मे क्षेष्ठा इति। अभिमृश्याभिमर्शनं नि त्यर्थः॥ तां चाभिमर्शनीं वाचयेत्। प्रत्यगाशी
ष्ट्वा न्मंत्रस्य॥ अथैनां पूर्णपात्रात्प्रति दिशमुदकमुदुक्षंतीं वाचयति। प्राच्यां दिशि देवा ऋत्वि
जुदक्षंतां।

ओमार्जयंतां दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां प्रतीच्यां दिशि गृहाः पशवो मार्जयंतां
मुदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयंतामूर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मा
र्जयंतां मार्जयंतामिति वा ॥ पूर्णपात्रादुदकं गृहीत्वा तेनोदुक्षंतां चैवं कुर्वतीं वाचयति ॥ अत्रो
दुक्षणमकुर्वत्या वाचनेमंत्रलिंगस्याविरोधाभावादुदुक्षणमपि विधीयते ॥ पूर्वत्र तन्मंत्रलिं
गादेवाभिमर्शो। नं अकुर्वत्यामंत्रोच्चारणं न संभवतीति न तस्याभिमर्शनं विहितं मार्जयंतामिति
वेति पदद्वयमात्रविकल्पः ॥ अथास्या उत्तानमंजलिमधस्ताद्योक्त्रस्य निधायात्मनश्च सव्यं पू
र्णपात्रं निनयन्वाचयेन्माहं प्रजां परासिचं या नः सयावरीस्थन ॥ समुद्रे वो निनयानि स्वं पाथो
अपीथेति ॥ योक्त्रस्याधस्तात्पत्न्यंजलिमुत्तानमात्मनश्च सव्यं पाणिमुत्तानं निधाय पूर्णपा
त्रं निनयन्माहं प्रजामिति तां वाचयेत् ॥ यथा तं निनीयमानमुदकं हस्तेष्ववपते तथा निनये
त् ॥ प्राङ्मुखत्वमत्र नाद्रियते ॥ अधस्तादंजलिनिधानस्यादृष्टार्थत्वप्रसंगात् ॥ अत्र पत्नी
द्वित्वे बहुत्वे वा सर्वासां वाचनं कर्तव्यं ॥ प्रतिपत्ति योक्त्रविमोचनमावर्तते सर्वेषां योक्त्राणां द्वि
गुणीकृत्य निधानं भवति निनयनेन सर्वासां स्वस्वयोक्त्रसंपृक्तोदकलाभायोदुक्षणेपि सर्वासा
मन्वयः ॥ वाचनेवाच्यमंत्रलिंगजनितकार्याभावेपि वाच्यस्य पुरुषस्यैवायं संस्कार इत्यवगं
तव्यं । यएते पत्नीसंबंधाः पदार्थास्ते सर्वे परस्परसंबंधाः ॥ अथशब्देन तच्छब्देनान्येन वा अन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तेसर्वे सहैव कर्तव्याः॥ नैकैकशः॥ वेदस्तरणान्यग्रे गृहीत्वाऽविधून्वत्संततं स्तरणं सव्येन गार्ह
पत्यादाहवनीयमेति तंतुं तन्वन्नजसो भानुमन्विहीति॥ वेदबंधस्य मुक्त्वा स्तरणानी स्रुच्यंतेता
नि दक्षिणेन हस्तेनाग्रप्रदेशे गृहीत्वा अविधून्वन्विचलके नाकंपयन् गार्हपत्यादारभ्य सव्येन
हस्तेन संततं स्तरणान्याहवनीयं गच्छति॥ तंतुं तन्वन्नित्यास्तरणमंत्रः॥ न गमनमंत्रः॥ ततो मंत्रां
तिस्तरणारंभः॥ शेषं निधाय॥ अत्यगुद गार्हवनीया द्व स्थाल्याः स्रुवेणादाय सर्व प्रायश्चित्ता
नि जुहुयात्। स्वाहाकारांतैर्मंत्रैर्न चेन्मंत्रे पठितो य। शेषं निधायेति वचनात्तानि न सर्वाणि स्तरि
तव्यानि नियमेन शेषितव्यानीति गम्यते॥ आज्यस्थाल्याः स्रुवेणाज्यमादायाहवनीये स्रुवे
णैव जुहुयात्॥ आहवनीयात्प्रत्यगुदगावस्थाय सर्वप्रायश्चित्तानीति संज्ञैषां होमानां स्वा
हाकारांतैर्मंत्रैर्मंत्रांते स्वाहाकारं कृत्वेत्यर्थः॥ न चेन्मंत्रे यत्र क्वापि स्वाहाकारो न पठितस्त
दांते स्वाहाकारः कर्तव्यः॥ यत्र क्वापि पठितश्चेत्स एव प्रदानार्थो भवति यत्किंचाप्रेषितो यजे
दन्यत्रापि। यः कश्चनास्मिं छास्त्रे देवतोद्देशेन द्रव्यत्यागात्मको व्यापारो यागो होमो भ्याध्यानं
बलिहरणादयो वा मंत्रेण साध्यंते तत्र सर्वत्र। स्वाहाकारः कर्तव्य इति सूत्रार्थः॥ अन्यत्रे
ति वचनं गार्ह्येष्वपि प्रापणार्थं अप्रेषित इति वषट्कारसमुच्चयनिवृत्त्यर्थं। एवंभूतो व्यक्तहो
माभ्याधानोपस्थानानि च॥ एवंभावो नामैवं प्रकारविशिष्टः कर्ता एवंभूत इत्युच्यते॥ विशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षणपरो यं निर्देशः॥ अव्यक्तशब्देन अविहितविशेष उच्यते॥ यत्र होमाभ्याधानोपस्था
नान्यविहितविशेषाणि विधीयंते॥ तत्रानेनप्रकारेणकर्तव्यानीत्यर्थः॥ एकदेशविशेषे चा
प्यपेक्षितमस्माद्दृश्यते॥ अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्वमया असि॥ अया सावय
साकृतो यासन्हव्यमूहिषे यानो धेहि भेषजं स्वाहा॥ अतो देवा अवंतु न इति द्वाभ्यां व्याहृ
तिभिश्च भूः स्वाहा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः स्वाहेति। एकमंत्राणि कर्माणीति न्या
येन द्वाभ्यां द्वे आहुती होतव्ये॥ व्याहृतिभिरिति निर्देशं कृत्वा पुनः पठितेन ज्ञायते व्याहृत्युप
देशोनेन क्रमेण चत्वार इति। हुत्वा संस्थाजपेनोपस्थाय तीर्थेन निष्क्रम्यानियमः॥ स्यादि
ति शेषः॥ हुत्वेति वचनं संस्थाजपेन होमस्य संबंधार्थं यत्र संस्थाजपोस्ति तत्र प्रायश्चित्त
होमोपि भवतीति॥ अतः सोमेष्टिष्वपि संस्थाजपस्य प्रयोज्यत्वात् प्रायश्चित्तहोमोपि प्रयोज्य
एव॥ उपस्थायांते तीर्थेन निष्क्रामेत्॥ निष्क्रम्यानियम इति अर्थलुप्तानियमाद् इत्यर्थः॥ अ
र्थलुप्तत्वे सत्यपि अनियमविधानं कर्ममध्येपि तीर्थेन निष्क्रांतस्य अव्याहृत्यादयो नियमा
न भवंतीति॥ तेन प्रयोगमध्ये मार्गांतरेण निष्क्रांतस्यापि निगमाभवं स्येवेति ज्ञायते॥ ओं च
मे स्वरश्च मे यज्ञोपच ते नमश्च॥ यत्ते न्यूनं तस्मैत उपयत्तेतिरिक्तं तस्मै ते नमः॥ इति संस्थाजप
अ॰न्वर्थसंज्ञेयं तेनायं सोमेष्टिषु न भवति॥ इति होतुः॥ इति शब्देनैतावत्त्वमुच्यते। एताव
देव होतुर्नान्यदिति होतृग्रहणं होतुरेवैतावत्॥ आग्नीध्रस्यान्यदपीति॥ ११॥ अथशब्दो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिकारार्थः॥ इदानीं ब्रह्मणोऽपि विधयो वक्ष्यन्त इत्यर्थः। होत्राचमनयज्ञोपवीतशौचाभि
व्याख्यातानीत्यर्थः॥ स्नानाचमनादिना शुचिर्भूत्वा ब्रह्मत्वं करिष्यामीत्यागुरितो विह
रं प्रविशन् प्राङ्मुखः आचमनं कुर्यात्॥ कर्मांगत्वाद् यज्ञोपवीतग्रहणं पेत्र कमानुषयोर
पि कर्मणोर्वचनादृते यज्ञोपवीत्येव स्यादित्येवमर्थं। शौचग्रहणं कृत्वार्थमप्यशुचित्वसं
पादियन्नदिहाराद्बहिः कर्तव्यमिति॥ एतच्चाप्राप्तं विधीयते॥ अयमपि तीर्थेन विहारं प्रपन्न
इति। प्राकूर्चेष्टतास्य नेष्यते यज्ञमना इति कर्माभिमुख्य एव यज्ञमनस्त्वोपपत्तेः॥ अंकु
धारणमुपवेशांगतया आलभद्दृष्टार्थतापरिहारायेव यावदासनमनुवर्तते॥ तत्रचेत्क
र्मेत्यस्यापि कर्मसंबन्धात्॥ अव्यावृत्तिरविशिष्टेव दक्षिणांगतायत्र त्व चेत्कर्मेत्यस्य उत्तरां
गत्वेनाविशेषादस्यापि भवति॥ नित्यः सर्वकर्मणां दक्षिणतो ध्रुवाणां व्रजतां वा॥ अन्य
तः प्राप्तस्य ब्रह्मणोऽयं नियम उच्यते॥ ध्रुवाणां व्रजतां च पुरुषाणां यानि कर्माणि तेषां दक्षि
णतो नित्यो भवेत्॥ प्राकृतानाम प्राकृतानां च ध्रुवाणां नित्यं दक्षिणत्वं ध्रुवेष्वेव कर्तुं शक्य
त इति ध्रुवेषु ध्रुव एव भवेत्। व्रजता कर्मसु नित्यं दक्षिणत्वाय व्रजेनेव भवेत्। ध्रुवाणां व्रजता
मिति कर्तृविशेषणं न कर्मणां नित्यत्वमत्रोपक्रमप्रभृत्यापरिसमाप्तेर्दक्षिणत्वसिध्यर्थं।
वा शब्दः समुच्चयार्थः। क्वचित्कर्मणि कश्चित्तिष्ठति कश्चिद्व्रजति तत्र भूयसां धर्मः परिग्राह्य

ते॥ बहिर्वेदियां दिशं व्रजेयुः सैव तत्र प्राची॥ यत्र बहिर्वेदि वसतीवरीग्रहणादिकर्तुं यां दिशमभि
मुखा व्रजंति ऋत्विजस्तत्र तामेव दिशं प्राचीं कृत्वा दक्षिणतो भवेत्॥ सैव तत्र प्राचीति वचनात्॥ ब
हिस्तिष्ठ तामभिमुख एव प्राचीभवेत्॥ चेष्टास्वमंत्रासु स्थानासनयोर्विकल्पः॥ अमंत्रेषु कर्मसु
स्थानमासनं वा भवेत् वा शब्देनैव विकल्पे सिद्धे विकल्पवचनमव्यवस्थया विकल्पसिध्यर्थं
तेनैकस्मिंनपि प्रयोगे क्वचिदासनं क्वचित्स्थानमिति लभ्यते॥ तिष्ठद्धोमाश्च येवषट्काराः॥ तिष्ठ
तां ये होमा वषट्काररहिताश्च तेषु स्थानमासनं वा भवेत्॥ आसीतान्यत्र॥ अन्यत्रेत्यनंतरसूत्र
द्वयविषयादन्यत्रेत्यर्थः॥ समपाण्यंगुष्ठो ग्रेणाहवनीयं परीत्य दक्षिणतः कुशेषूपविशेत्॥ सम
स्तौ पाणी अंगुष्ठौ च यस्य सोयं समस्तपाण्यंगुष्ठः सव्येन पाणिना दक्षिणपाणितलप्रदेशं गृ
ह्णीयात्॥ दक्षिणेन सव्यांगुष्ठं एवं कृते पाणी अंगुष्ठौ च समस्तौ भवतः॥ एवंभूतो यणाहवनीयं प
रीत्य तस्य दक्षिणतः कुशेषूपविशेत् निरसनं कृत्वा कुशग्रहणात्स्तृतिसंभवेत एवासने प्रक
ल्प्यते। दक्षिणत इति पुनर्वचनमाहवनीयस्यैव दक्षिणतो न क्रियमाणस्य कर्मण इत्येवमर्थं
बृहस्पतिर्ब्रह्माब्रह्मसदने आशिष्यते बृहस्पते यज्ञं गोपायेत्युपविश्य जपेत्॥ उपविश्य यहणं
सद्दुपविश्य पुनरपि कर्मण एव दक्षिणतो न भवेत्॥ आसमा[illegible]प्तेस्तत्रोपविशेत् इति॥ एष ब्र
ह्मजपः सर्वयज्ञतंत्रेषु साग्नो यत्रो पवेशनं॥ एष मंत्रो ब्रह्मजपसंज्ञो भवति स चाति देशशब्दम
नपेक्ष्य सर्वेषु यज्ञेषु भवति॥ तंत्रग्रहणं पाकयज्ञेष्वपि प्रापणार्थं पाकयज्ञानामेतत्तंत्रमभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तितंत्र शब्दत्वात्तेषामिति ॥ साग्नौ यत्रोपवेशनमिस्यग्निप्रणयनेनसाग्नित्वेकर्मणः प्रति
पंनेयत्रोपवेशनंविहितंतत्रायंजपोभवति ॥ एतदुक्तंभवति । एषजपः सर्वेषुयज्ञेषुप्रवि
ष्टमात्रेभवेत् ॥ अग्निप्रणयनवत्स्वग्निप्रणयनेतएवभवति ॥ उपविष्टमतिसर्जयते ॥ अ
नुज्ञालाभार्थंमंत्रेणामंत्रयते । अध्वर्युरित्यर्थः ॥ ग्रहणंप्रवेशकालज्ञापनार्थं ॥ यस्मिन्का
लेप्रविष्टस्योपवेशनानंतरमध्वर्युणाऽतिसर्जनंसंभवतितस्मिन्कालेप्रविशेदित्यर्थः ॥
ब्रह्मन्नपः प्रणेष्यामीतिश्रुत्वाभूर्भुवस्वर्बृहस्पतिप्रसूतइतिजपित्वोप्रणयेत्यतिसृजेत्स
र्वत्र । अध्वर्युमंत्रपाठोऒंशब्दसहितेपिअनुज्ञावचनेॐप्रणयेस्येवानुजानीयान्नापःप्र
णयेत्येवंश्रुत्वेतिवचनंश्रुत्वापश्चाज्जपेनसहेति । जपित्वेतिपूर्वस्योपांशुत्वायोत्तरस्यच
तंत्रस्वरत्वाय ॥ अतिसृजेदनुजानीयात्सर्वत्रेतिसर्वेष्वनुज्ञावचनेषुअस्यविधेः प्रापणा
र्थं । ऊर्ध्वंवाप्रणवात् । उच्चैर्भवतीत्यर्थः ॥ अनतऊर्ध्वंवाग्यत आस्त आहविष्कृतउद्वादनात् ॥
प्रणीताप्रणयनोपलक्षिताकालादूर्ध्वमाहविष्कृन्मंत्रोच्चारणाद्वाग्यतोभवति । आस्त
इतिवचनममंत्रेष्वपिकर्मस्वस्मिन्नवसरेआसनमेवेतिनियमार्थं ॥ आमार्जनास्यशौ
पशावग्निप्रणयनमारभ्यआचात्वालमार्जनाद्वाग्यतोभवेत् ॥ सोमेघर्माद्दिचातिप्रे
षादिचासुब्रह्मण्यायाः । मैं घर्ममारभ्यअतिप्रेषंचारभ्यआसुब्रह्मण्यायावाङ्नियमः सो
मग्रहणंपश्वधिकारात्पशुनामकृएवसोमेस्यादितितंनिवर्त्यसर्वसोमेषुप्रोपणार्थं । प्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरनुवाकाद्यांतर्यामात् ॥ प्रातरनुवाकलक्षितात्कालादूर्ध्वं आ अंतर्यामग्रहयागात् ॥ ह
रिवतोनुसवनमेढायाः ॥ तथा सवनत्रयेपि पुरोडाशप्रचारे मारभ्य आपुरोळाशेळायाः ॥
स्तोत्रेषु तिसर्जना द्यावषट्कारात् ॥ स्तोत्रादौ स्तुध्वमिति उपाकरणं । तदादि आशस्त्रयाज्या
वषट्कारानुमंत्रणाद्वाग्यतो भवेदित्यर्थः ॥ ओ द्वचः पवमानेषु । पवमाने स्तोत्रेषूपाकरणादार
भ्य आ उद्दृचः । उद्दृगिति समाप्तिरुच्यते ॥ यच्च किंचमंत्रवत् ॥ सर्वत्र मंत्रवति वाग्यमनं भवति ।
होत्राशेषः ॥ उक्तो द्वन्यो यो विषयस्तत्राप्यस्य वाग्यमनं होतृतुल्यं भवति । आतो वाग्यमनं इत्या
दि नियमो स्याप्यधिक्रियत इत्यर्थः ॥ आपतिश्च । आपद्यातो देवा अवं तु न इति जपेदित्युक्तत्वाद्दे
नस्प्रायश्चित्तमापत्तिरित्युच्यते । अनंतरोक्तैर्नवभिः सूक्तैर्विहितस्य वाग्यमनस्य भ्रेषे एतद्देव
प्रायश्चित्तमित्यर्थः ॥ अन्यत्रैव भूरिस्वाहुः । यत्र त्वग्निः प्रणीयते पि ससोमे न तदादि तत्र वाग्य
मनं ॥ विहित एव वाग्यमने तदादिमात्रमत्र विधीयते तु शब्दसमन्वयात् ॥ अपि ससोमे सो
मसहिते अग्नीषोमीयप्रणयनेपीत्यर्थः ॥ तत्रेति वचनं यस्मिन्नहनि अग्निः प्रणीयते
तस्मिन्नेवाहनिकर्मप्रवृत्तौ तदादि वाग्यमनं न पूर्वेषु । प्रणयने तदादित्व नियमः । तथा च
सद्यस्कालेषु पूर्वेषु प्रणीयते वरुणप्रघासादिषु । दक्षिणतश्च व्रजं जपस्याशुः शिशान इति सू
क्तं ॥ सूक्तग्रहणं व्रजं जपतीति व्रजतो जपविधानात् ॥ व्रजनसमाप्तावपि इत्तत्सूक्तप्रयोगविधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यान्नाग्निं सोमं वा प्रणयतः तदाग्नेयेण
नार्थं दक्षिणतो व्रजन विधानं दक्षिणतो व्रजत एवायं जपः स्यान्नाग्निं सोमं वा प्रणयतः तदाह्य्मेण
गच्छतीति। समाप्योपवेशनाद्युक्तं॥ समाप्येति वचनं समाप्याोपवेशनादि यदुक्तं तदेव कुर्यान्न सूक्ता
वृत्तिं गमनापरिसमाप्तावपीति। आदिग्रहणेन ब्रह्मजपः परिगृह्यते उपवेशनग्रहणेन निरसनम
पिगृह्यते सहचरितत्वात्॥ एतत्रयमग्निप्रणयनाग्नीषोमीयप्रणयनयोरन्ते विधीयते। तेन सूत्रेण सा
ग्नो यत्रोपवेशनमित्यनेन साग्निप्रणयनेषु पश्वादिकर्मसु अग्निप्रणयनान्त एव ब्रह्मजपो नान्य
त्रेति नियम्यते। ननु सौमिके प्रणयने ब्रह्मजपः। सोमे ऽप्यग्निप्रणयनं तदन्ते न ब्रह्मजपो भवति।
तत्र निरसनोपवेशने एव भवतः॥ अन्यत्र विसृष्टवाग् बहु भाषीय शमगाः पठेम नाः क्रियमाणपुद
यपरामर्शी विसृष्टवागपि यजमानः स्यादिति योगविभागः कृतः॥ विपर्यासे नन्तरिते मन्त्रे कर्मणि वाख्याते वा
पलक्ष्य वा जान्वाच्याहुतिं जुहुयात्। विपर्यासो व्युत्क्रमः अन्तरायो निमित्ते न मन्त्रयोः कर्मणोर्वा विपर्यासे
नरितेमन्त्रे कर्मणि वा स्वयमुपलक्ष्य रेण वाख्याते दक्षिणं जानु निपात्य वक्ष्यमाणेन मन्त्रेण वक्ष्यमाणे
नावाहुतीं जुहुयात्॥ सर्वत्र जानुनिपातनमुपस्थस्योत्तानत्वाविरोधेन कर्तव्यं नन्यगभावे केनचिद्
घकारेणांबष्ठ्यादिना ऽदोषनिबंधनात्॥ आख्यातोपलक्षणग्रहणमन्यस्मिन्नपि विघ्ने यथा
कंचित् ज्ञाते एतत्प्रायश्चित्तं भवतीत्येवमर्थं॥ तेनैवमस्य सूत्रस्यार्थोवगन्तव्यः॥ सर्वेषु ऽपेषेत प्राय
श्चित्तं सामान्यरूपेण भवति। यदन्यत्तन्त्रे विशेषे विहितं तदस्यापवादकं भवति विपर्यासान्तरितये।
रत्नभेदेन ग्रहणात्तद्विषये विशेषेणाप्यस्य समुच्चयो भवतीति। सर्वेषां नैमित्तिकानामयमुत्सर्गः॥
निमित्तादनन्तरं कर्तव्यमिति। यस्य पुनर्बलवता प्रमाणेनानन्तरं कर्तुं न संभवति। तस्य यावत्संभवमुत्क

49

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षीनास्यं तमिति। वाशब्दस्य द्विरुच्चारणं ज्ञात एव निमित्ते तन्निमित्तमिति
एतत्प्रायश्चित्तं न पूर्वोक्तं सर्वं प्रायश्चित्तवदज्ञातेपीति ज्ञापनार्थं। आहुतिमित्येकवचनं बहुष्वपि
निमित्तेषु युगपज्ज्ञातेष्वेकैवाहुतिः कर्तव्या न प्रतिनिमित्तमिति ज्ञापनाय। ऋक्तश्चेद्भूरिति गार्ह
पत्ये यजुष्टो भुव इति दक्षिणाग्नावाग्नीध्रीये सोमेषु। आग्नीध्रीयप्रणयनात्सोमेपि दक्षिणाग्नावेव द
क्षिणाग्न्यर्थत्वादाग्नीध्रीये प्रणयनस्य। सामतः स्वरित्याहवनीये सर्वतोवि
ज्ञाते भूर्भुवस्स्वरित्याहवनीय एव। यदा सर्वे वेदेभ्यो युगपत् भ्रेषाः आगच्छेयुस्तदा समस्ताभिरेका
हुतिराहवनीय एव कार्या। एवकारग्रहणं समस्ताभिरेकाहुतिराहुराहवनीय एवेति ज्ञापनार्थं। अ
विज्ञात इति स्मार्तानां शौचाऽऽचमनादीनां भ्रेषस्य प्रापणार्थं। एते ऋगादयः शब्दा वेदवचना न
जातिवचनाः। आकृप्रयाजेभ्योऽङ्गारं बहिष्परिधि निर्वर्त्य स्रुवदण्डेनाभिनिदध्यान्मा तपो मा यज्ञ
स्तपन्मा यज्ञपतिस्तपत्॥ नमस्ते अस्त्वायते नमो रुद्र परायते॥ नमो यत्र निषीदसीति। आकृप्र
याजेभ्य इति स्रुगादापना आकृष्टः स स्रुन्नं संगच्छते। बहिः परिधीत्यस्य परिधिशब्दस्य देशोप
लक्षणार्थत्वात्सर्वतो निर्वर्त्य गृह्यते। तच्च वक्ष्यमाणे सूत्रे स्पष्टयति। अमुं मा हिंसीरमुं मा हिंसी
रिति च प्रतिदिशम् अध्वर्युयजमानौ पुरस्ताच्चेद् ब्रह्मयजमानौ दक्षिणतो। होतृपत्नीयजमानान्पश्चा
दाग्नीध्रयजमानावुत्तरतः॥ अध्वर्युं मा हिंसीर्यजमानं मा हिंसीरित्येवमन्तेन मा तप इत्यनेन पु
रस्तान्निर्गतेमग्निं निदध्यात्॥ एवमुत्तरेष्वपि प्रयोगो द्रष्टव्यः। चशब्दो मुमादेः पूर्वेण समुच्च

६ भ्यो

३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यार्थः॥ दिगनुक्रमेण प्रतिदिशं ब्राह्मणार्थे सिद्धएव यस्त्वति दिशा ग्रहणं करोति न तु स्थापयति सर्वे दिक्संब
द्धं कर्मानेन क्रमेण कर्तव्यमिति। अथैनमनुप्रहरेदाहं यज्ञं ददे निर्ऋते ते रूपस्यान्नं देवेषु परिददामि विद्वा
न्॥ सुप्रजास्त्वं शतहिमा मदंतु इह नो देवा मयि शर्म यच्छंतेति। न स्वाहाकारः॥ तमभिजुहुयात् सहस्रस्य
गो वृषभो जातवेदाः सोम पृष्ठो घृतवान्सुप्रतीकः॥ मा नो हिंसीद्धिंसितो नेत्वा जहामि गोपोषं च नो
वीरपोषं च यच्छ स्वाहेति। तमिति प्रस्तरमेवांगारमभिजुहुयादित्यर्थः॥१२॥ प्राशित्रमाह्रियमाणं
मीक्षते मित्रस्य त्वा चक्षुषा प्रतीक्ष इति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति
गृह्णामीति तदंजलिना प्रतिगृह्य पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थ इति। कुशेषु प्रागदंडं
निधायाग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेनेत्याचम्यान्नो चामेत्तेसस्येन त्वाभिजिघर्मि याअपस्व
तर्देवतास्ताइदं शमयंतु चक्षुः श्रोत्रं प्राणान्मे मा हिंसीरितींद्रस्य त्वा जठरे दधामीति नाभिमाल
भेत प्रक्षाल्य प्राशित्रहरणं त्रिरनेनाभ्यात्ममपो निनयते। न दिस्याद्धृतस्य प्रतिग्रहणार्थिना ह्रिय
माणस्येति। अंतर्वेदि कुशेषु प्रागदंडं प्राशित्रहरणं निधायासंखादं प्राश्नीयात्॥ असंखादं दंतै
रपीडयन्नित्यर्थः॥ शेषोचार्थमा॥ चमनं कृत्वा यश्वा मंत्रेणापः पिबेत्॥ पुनरपि प्राग्नछोचार्थमाच
मनं कुर्यात्॥ अनेन प्रक्षालितेन प्राशित्रहरणेनात्मानमभिमुखेन हस्तेन च तथाभूतेनात्मनः
पुरतस्त्रिरपः सिंचेत्॥ मार्जयित्वास्मिन्ब्रह्मभागं निदध्यात्॥ सर्वैः कृतैरिळाभक्षणस्यानुष्ठेयत्वा
त्तदंगत्वाज्जमार्जनस्य अस्मिन्नवसरे अयमपीळां भक्षयित्वा मार्जनं च कृत्वा ततः पश्चाच्चतुर्धाक

(८)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणे हृते॰ ब्रह्मण आनीतं ब्रह्मभागं प्राशित्रहरणे निदध्यादित्यर्थः॥पश्चात्कुरेषु यजमानभागं
यस्मिंदेशे प्राशित्रहरणं निहितं तस्य पश्चात्कुरेषु यजमानभागं निदध्यात्। न प्राशित्रहरण इत्यर्थः॥
अन्वाहार्यमन्वेक्षेत तत्र जापते भागोऽस्यूर्जस्वान्पयस्वानक्षितिरसि मा मे क्षेष्ठा अस्मिंश्च लोकेऽमुष्मिंश्च
इतिकारोऽध्याहारेण सूत्रछेदः प्राणापानौ मे पाहि कामाय त्वेत्यस्य स्थाने प्रायांगुष्ठोपकनिष्ठिकाभ्यां शिष्टं
गृहीत्वा ब्रह्मभागे निदध्यात्। अन्येनांगेनास्पृष्टं न वजिघ्रेत्। अन्वाहार्यं प्राणापानावित्यादिना शिष्टं विशि
ष्टं पुलाकं मात्रमित्यर्थः॥ तन्मात्रमन्वाहार्याद्गृहीत्वा ब्रह्मणो भागे निदध्यात्। ब्रह्मन्प्रस्थास्याम इति श्रुत्वा बृ
हस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्ट बृहस्पते यज्ञं मजूगुपः सयज्ञं पाहि सयज्ञपतिं पाहि समां पाहि भूर्भुवः
स्वर्बृहस्पतिप्रसूत इति जपित्वों प्रतिष्ठेति समधमनुजानीयात्॥ अथ यथुमंत्रपाठः ~~समुच्चयार्थः~~॥स
मिहृ~~समंसमादाधा~~नो प्रस्थास्यामः प्रस्थास्यामीति वा श्रुत्वाऽपि प्रतिष्ठेत्येवानुज्ञावचनं ब्रूयादित्येव
मर्थः। भूर्भुवः स्वरित्यादेः पाठः समुच्चयार्थः समिहृहाणं समिदाधानोनुज्ञानमपि सकृत्प्रतिष्ठेत्येवंरूप
मेव भवति नाधेहीत्येवं रूपमित्येवमर्थः॥ संस्थिते जघन्यमृत्विजां सर्वप्रायश्चित्तानि जुहुयात्॥
ऋत्विजां कर्मसु संस्थितेषूपरतेष्वनुपरते यजमानकर्मणि जघन्यः सन्सर्वप्रायश्चित्तानि जुहुया
तु॥ तमितरेऽन्वालभेरन्॥ अत्राग्नीध्रोऽप्यन्वारभेत ब्रह्माणं बहुवचनं विवक्षितमित्यर्थः॥ होतारं वा॥ होता
रं वेतरेऽन्वालभेरन्॥ एतयोर्नित्यहोमः॥ होम एवैनयोः कार्योऽन्वारंभः परस्परमित्यर्थः॥ सर्वे संस्था
जपेनोपतिष्ठन्त उपतिष्ठन्ते॥ सर्वे होमकर्तारोऽन्वारंभकर्तारश्चेत्यर्थः॥ ॥१३॥ ॥श्रीराम्॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥पौर्णमासेनेष्टिः०शः॥प्रथमेध्यायेदर्शपूर्णमासौव्याख्यातौतौवि
ध्यंतसहितौ।उत्तरत्रेष्टयःपशवश्चसोमश्चवक्ष्यंतेविध्यंतरविहिताः।तेषांविध्यंतरापेक्षास्ति
यथार्हं।नहितत्करणंलोकेवेदेवाकिंचिदृष्टं।इतिकर्त्तव्यतासाध्यायस्यनानुग्रहे
स्थितेति।एवंचतदपेक्षायांसत्यांतदपिवैदिकमेवश्रौतमेवस्यादितिसिद्धं।श्रौतेषुचाग्नि
होत्रिकदार्शपौर्णमासिकसौमिकेषुत्रिषुसत्सुअस्यदमितिविध्यंतविशेषग्रहणंवा
दनासामान्यंचमुक्त्वान्यस्यविशेषलिंगस्याभावात्तैरेवविशेषलिंगैर्विध्यंतरविशेषः
परिगृह्यते।तानीमानिविध्यंतरविशेषग्रहणलिंगानिनिर्वपेत्तंडितस्वाज्यमोषध
त्वंपयोदधि।कपालानिचतत्संख्यादेवताशब्दएवच।तस्मिन्नेसरसरस्यावत्तधान्य
ह्योकवत्कपि।द्रव्यत्वंप्राकृतःशस्त्रोहविषःप्रभवादिच।एतत्प्रालक्षणशब्दश्चतद्वदिसु
पदेशनं।नामधेयंतथाव्यक्तचोदनाचाव्यदीदृशं।लिंगान्येतानिचान्यानिगुरूणिच
लघूनिच।समीक्ष्यप्रकृतिश्चैवविकृतिश्चेतिकल्पना।द्रव्यदेवतयोर्यत्रनिरोधस्तत्रनि
श्चयो।तत्रद्रव्यंबलीयस्याद्देवतायाइतिस्थितिः।यत्रसर्वासामिष्टीनांदर्शपूर्णमासौप्र
कृतीतत्राविशेषलिंगात्कासांचिद्दर्शःप्रकृतिः।कासांचित्पौर्णमासीत्येवसमीक्ष्यव्यव
स्थाकल्पनीया।एवंसर्वेषांपशूनांदर्शपूर्णमासावेवप्रकृतीतद्धितादिविशेषलिंगात्।
अग्नीषोमीयस्यपशोरन्येषांच।अत्रन्यायविदआहुः।अग्नीषोमीयस्यपशोर्दर्शपूर्णमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू०पू०१०
॥१॥

सोऽप्रवृत्तौ। नान्येषां पशूनां। स चातिदेशिकैरौपदेशिकैश्चासंबद्धेऽन्येषां पशूनां प्रवृत्तिः।
एवं सत्युपकारप्राप्तिरखंडिता भवतीति। सत्यामेषां न्यायविदां स्थितिः। किं त्वत्र कल्पसू
त्रकाराणामेवं प्रवृत्तिः। सर्वेषु पशुषु दार्शपौर्णमासिको विध्यंतो दर्शपूर्णमासाभ्यामेव
प्राप्नोति। अग्नीषोमीयाच्च पशोः प्राकृत इति। अत एवास्मिन्सूत्रेऽग्नीषोमीयमनुक्त्वा प
शुसामान्यवाचिनं पशुशब्दमेव प्रयुक्तवानाचार्यः। तेनैवायमतिदेशः सर्वेषां पशूनां।
नाग्नीषोमीयस्यैवेति गम्यते। अत एव भाष्यकारः अप्रसवनीयेनास्मिन्सूत्रे यद्देव
ताग्रहणस्य दप्रयोजनमुक्तवान्। अनुक्तदेवतानामपि पशूनां सवनीयत्वप्राप्तौ तेषामे
पि समाम्नातत्वं भवतीति। समाम्नातत्वे च वार्त्रघ्नावाज्यभागस्य लाभः प्रयोजनं नान्यत्।
अतः सर्वपशुनामतिदेशः सिद्धः। तत्राग्नेय उपांशुयाजोऽग्नीषोमीय इति पूर्णमाससंस्कृ
यागाः। आग्नेय उपांशुयाजः ऐंद्राग्न इत्यसन्नयतोऽमावास्यायां संनयत ऐंद्राग्नस्य
स्थाने ऐंद्रो महेंद्रो वा दधिपयसी इति। तयोः समुदाययोरपि पौर्णमास्यमावास्याना
म्नी भवतः। अनयोस्तत्र साधारणं। एतावानेव भेदः प्रधानदेवताः आज्यभागयोरनु
वाक्ये च। यत्र प्रधानदेवताविकृतिषु प्रसक्तास्तत्रातिदेशव्यापारो नास्ति। अतो यावि
शेष्यादाज्यभागानुवाक्ययोरेवातिदेशः फलति। एवं स्थिते अस्मिन्नूणसूत्रे समाम्ना
ताऽष्टव्यः यः पशाव श्रस्वप्रकरणेऽविशेषिताज्यभागाश्चानेषामध्येकेषांश्चित्। वार्त्र

॥१॥

(53)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नावाज्यभागनामत्वात् दुपेक्षणार्थमितत्सूत्रप्रणीतवानाचार्यः। तस्यायमर्थः। उपदिष्टाः स
माम्नाता इत्यर्थः। अनुवादत्वेन चायं न्यायः संबध्यते। अतो यमर्थः सूत्रस्य यस्मिंश्छास्त्रे उपदि
ष्टा इष्टयः पशवो वस्त्रादि अविनोषिताज्यभागास्ते सर्वे वार्त्रघ्नाज्यभागा इति। पौर्णमासेनेत्यस्या
यमर्थः। पौर्णमासेन व्याख्याता इति। वार्त्रघ्नाज्यभागा इत्यर्थः। तेन समाम्नातानामिष्टीनां
पशूनां च अन्यदेवतागममात्रः सिद्धो भवति। तथा चोक्तमिष्ट्ययनप्रकरणे। असमाम्ना
तास्वेव यावत्तंत्रविकारः इति। तत्र पशूनामपि प्रदर्शनार्थत्वेनोक्तमिति द्रष्टव्यं। सोमग्रहणमुत्तरा
र्थं। अत्रापि किंचित्प्रयोजनमस्ति। याज्याधर्मानिरसनादयश्चैवं प्रकाराः श्रुतारनारभ्याधी
ताः। अथ यस्मिंश्छास्त्रे दर्शपूर्णमासप्रकरणविहितास्तेषां प्रापणायेति। तेरमावा॰ यजेत। ते
रिष्टिपशुसोमैरमावास्यायां पौर्णमास्यां वा यागः कर्त्तव्य इति। इष्टिपशूनां प्रकृतिप्राप्तत्वा
यं कालः पुनर्विधीयते। ग्रहकालतां निवर्त्य सद्यस्कालता प्राप्त्यर्थं। किंचे दर्शप्रकृतेरमावा
स्या पौर्णमासप्रकृतेः। पौर्णमासीत्येवं नियमं निवर्त्य अनियमेन उभयकालता प्राप्त्यर्थं प्र
कृत्यविरोधात्पर्वणस्तद्दस्यहोरात्रविकृतिः कर्त्तव्या। यदाह्नः पूर्वभागे पर्वस्यात्तदा प्रकृतिं कृ
त्वा विकृतिः कार्या। यदा परभागे रात्रौ वा तदा विकृतिं कृत्वा प्रकृतिः कार्येति। सोमस्यायमप्रा
प्तः कालो विधीयते। इष्ट्यादिष्वारंभसंबंधादेव यजेतेत्यपि सिद्धे यजेतेति वचनं सोमस्य यागऽ
एवाऽनयोः कालयोः संपादनीयो नान्यत् दीक्षादीनि। राजन्यस्याग्निहोत्रं जुहुयात्। क्षत्रिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू०पू०टी० ॥२१॥

स्याग्निहोत्रहोमः पर्वणोरेव कर्त्तव्यो नान्यस्मिन्काल इति। चन्द्रादौ देवयोः पुनयोरेव कालयोरग्नि होत्रं जुहुयात् नान्यस्मिन्नित्येवगम्यते। कथमनयोरन्यस्मिन्काल इत्याह। तपस्विने ब्राह्मणेऽहरेत्। तपस्वी कर्मनिरतस्तस्मै ब्राह्मणाय। अतपस्विने पि ब्राह्मणायैव दद्यात्। न जात्यन्तराणि। अतपस्विने पीति। इतरकालमिति। इतरेषु सर्वेष्वग्निहोत्रकालेष्वित्यर्थः। भक्तमुपहरेत्। भक्तं पक्कोदनं पक्वान्नमुपहरेत्। दद्यात्। एतदुक्तं भवति। राजन्यवैश्ययोः पर्वण्यग्निहोत्रकाल द्वयं वर्जयित्वा इतरेषु कालेषु ब्राह्मणायोदनं दातव्यं। न होमः कर्त्तव्य इति। अग्निधारणं तु क्रियत एव। ऋतसत्ये न शीलः स्यात्। ऋतं वाङ्मनसयोः सत्यत्वं। सत्यं वाच एव। ऋतसत्यस्वभावः सोमयाजी च यः क्षत्रियो वैश्यो वा स सदा जुहुयादग्निहोत्रं न पर्वणोरेव। ऋतग्रहणेनैव सत्ये सिद्धे सत्यग्रहणं वाक्सत्यस्वभावस्यापि सर्वदा होमसिध्यर्थं। बहुषु बहूनि योगः। समानानामभिति न्यायः। अनेकेषु विहितेषु तानुद्दिश्यानेकेषां समानानां अनुदेशः। षश्याद्विधानेसत्यानन्तर्य योगः क्रमेण संबन्धः स्यादित्यर्थः। द्वंद्वं तु याज्यानुवाक्ये। याज्यानुवाक्ययोर्देवताभिरेव आनन्तर्य योगो भवति। एकस्या एकस्या देवताया द्वाभ्यां द्वाभ्यामृग्भ्यां। नैकैकस्या एकैकयेति। अदृष्टे दैवत्ये। यदि कश्चिदनेका देवता विधाय। कस्मांश्चिद्देवतायास्तल्लिङ्गयोर्याज्यानुवाक्ययो र्विधिं न कुर्यात्। तदा नियमो गृहीतव्य इत्येकोर्थः। अयमपरोर्थः। गृहीतत्वात्पुनस्ताभ्यो विहिताभिश्च सह देवताभिरानन्तर्ययोग इति। अदृष्टे विधिरित्यर्थः। नियम उक्त इत्यर्थः। अग्न्याधेयं॥

॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्न्याधेयप्रभृतित्वंकर्मणामनुष्ठानस्योक्तं।अनुष्ठानक्रमेणैवव्याख्यानमपीत्युक्तं।तत्रापोद्धा
तः।दर्शपूर्णमासौव्याख्यातौ।तत्प्रसंगादतिदेशास्तत्प्रसंगात्कालविधिः।तत्प्रसंगादेवाऽग्निहोत्र
होमप्रकारविधिःपरिभाषाप्रसंगात्कथंचिदानंतर्ययोगाद्विधिः।सूत्रत्रयेणोवंगतेसतिप्रथमप्रा
प्तमाधानमुच्यते।विशिष्टकालेविशिष्टदेशेविशिष्टपुरुषेणविशिष्टैर्मंत्रैर्गार्हपत्याद्यग्न्युत्पत्य
र्थंयदंगाराणांनिधानंतदग्न्याधेयमुच्यते।अग्नीनामाधेयमग्न्याधेयंतत्कर्त्तव्यमित्यर्थः।क
स्मिन्कालइत्याह।कृत्तिकासु०ष्याः।फल्गुनीविशिपूर्वोत्तरेचगृह्यते।अविशेषाद्बहुवचनाद्वा।
प्रोष्ठपदासूत्तरेएव।अतःसप्तएतानिनक्षत्राणितेषामेकस्मिन्नक्षत्रेऽग्न्याधेयंकर्त्तव्यमित्यर्थः।
एतेषांक०श्चित्।एतेषांकस्मिंश्चित्पर्वणिएवमेतत्सूत्रमर्थतोद्रष्टव्यं।उत्तरंचसूत्रंवसंतेपर्वणि
ब्राह्मणआदधीतेति।एवंकृतेसर्वमनुगुणंभवति।एतेषांनक्षत्राणांकस्मिंश्चिन्नक्षत्रेपर्वणि
वाऽग्न्याधेयंकर्त्तव्यमितीदंसूत्रपर्वणानक्षत्रसमुच्चयमग्न्याधेयस्यकालत्वेनविदधाति।पूर्व
सूत्रंतुकेवलंनक्षत्राणामेवाधानसंबंधंविदधाति।अतोदोषप्रसक्तोस्तःसमुच्चयस्तत्रप्रथमःकल्पः।
तदसंभवकेवलंनक्षत्रमेवेतिविनिवेशोयुक्तः।इदंकल्पद्वयसोमाधानवर्जितेषुसर्वेष्वाधाने
षुभवति।वसंतेपर्वणि०चीत्।इदमपिसूत्रमर्थतएवभवति।अनेनवसंतेब्राह्मणगुणक
माधानंविधीयते।ग्रीष्मवर्षाशर०त्सुः।वैश्यस्तक्षकर्मोपजीवीउपकुष्टइत्युच्यते।अग्निमित्सू
त्रेत्रीण्याधानानिविधीयंते।ग्रीष्मेक्षत्रियगुणकं।वर्षासुवैश्यगुणकं।शरदिउपकुष्टगुणकंच।

51

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०पू०२०
॥३॥

एते वसंतादयः शब्दा ऋतुवाचकाः। ऋतवो नाम षट्। वसंतग्रीष्मवर्षाःशरद्धेमंतशिशिराः। तेच
चैत्रमासमारभ्य द्वौ मासौ ऋतवः। वसंतादयो मासाश्चैत्रादय एव। यस्मिन्कस्मिं०श्चीत। आ
दधीतेति प्रकृते पुनरादधीतेति वचनं आपत्कल्पोयमाधानविधिरिति दर्शयति। अन्या
पदि मुमूर्षोः सर्वेष्वृतुषु आधानं कर्त्तव्यं। नैवानाहिताग्निर्म्रियेतेति। इदं चापरमाधानं। पू
र्वोक्तानि चत्वारि तेषु सर्वेषु पर्वनक्षत्रविध्यउपसंहर्त्तव्याः। न पर्वऋतुस्वातंत्र्येणाधानस्य
कालविधयो भवेयुः। अत एव सूत्रकारः पर्वनक्षत्रविधानामृतुविधिभिः संबद्धानामेवाधान
कालताप्रदर्शनार्थमेव। एतेषां कस्मिंश्चिद्वसंत इति पर्वनक्षत्रसमुच्चयविधिपरं सूत्रं उत्त
रसूत्राय पठितव्यं। ऋतुशब्दव्यतिषज्य पठितवान्। पर्वनक्षत्रविध्योर्ऋतुविध्युपसंहारेन्या
य विरोधश्च नास्ति। तत्रैव तयोरंतर्भावदर्शनादिति। सोमेन यक्ष्यं० न नक्षत्रं। अथैव सोमेन
यक्ष्य इति संकल्प्य य आधानमिच्छेत्स आधानस्य कालं नावेक्षेत। सोमापक्रमकालं एवाद
धातेत्यर्थः। अयमपि मुख्य एवाधानकालः। ऋतुनक्षत्रनिरपेक्षवचनं पर्वणोरपि प्रदर्श
नार्थं। अस्य मूलं यु दहरवेन मितिसोमाधानस्य विधायिका। न सोमस्य तेन वसंतसंबंधि
त्वं सोमस्य न बाध्यते। इष्टिश्च उत्तरकालतानुबाध्यते। सोमाधानयोरानंतर्यविधानादिति।
अश्वत्थाद्घमी० माणः। शम्यागर्भः शमीगर्भः शमीगर्भादश्वत्थादरण्याहरणं कुर्यात्। तत्
त्राधानार्थमाहरणादूते अध्वर्युणा अरण्याहरणे क्रियमाणे तेन सह यजमानोप्यनेनमंत्रे

॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णाहरेत्। यत्र न वेद्‌ समाणः पृष्टतोऽनवेक्षमाणः। अयं चापरोऽर्थः। कुर्यान्न कुर्यादिति नान्यदर्शेपस्
माणः। अध्यवसिताधानइत्यर्थः॥ यो ऽश्वस्तः स्यः २॰ तमग्न्याधेयं॥ पूर्णाहुतिरंते यस्य तत्पूर्णा
हुत्यंतं अग्न्याधेयं कर्तव्यं। तच्चाग्न्याधेयमरण्याहरणादि पूर्णाहुत्यंतं भवतीत्यर्थः। अस्य सूत्र
स्य प्रयोजनं पूर्णाहुत्यंते आहिताग्नित्वप्राप्तिः कथमिति चेत्। श्रुतावेवमाम्नातं। अग्नयः पुरु
षार्थसाध्या इति प्रस्तुत्य वसंते ब्राह्मणो ऽग्नीनादधीतेत्येवमादीनि वसंतादिकालानि ब्राह्म
णादि कर्तृकाणि। कर्तृगामिक्रियाफलयुक्तानि निरधिकाराणि। आधानानि विधाय। ततो ऽ
रणी आहरेत्। संभारान्संभरेत्। अग्न्यायतनानि कुर्यात्। केशश्मश्रु वपते। ब्राह्मौदनिकमौ
पासनिकं निदध्यात्। तस्मिन्ब्रह्मौदनं पचेत्। समिधश्चादध्यात्। आयतनेषु संभारान्निदध्या
त्। ब्राह्मौदनिकं अरण्योः समारोप्य मथित्वा गार्हपत्यादीनादध्यात्। तत्र काश्चित्समिध आद
ध्यात्। अग्निहोत्रं जुहुयात्। पूर्णाहुतिं जुहुयात्। तत आग्नेयमष्टाकपालं निर्वपेत्तदहरेव। त
दहरादि संवत्सरांतानां कालानां कस्मिंश्चित्काले पवमानहवींषि निर्वपेत्। ततश्चान्यानि ह
वींषीति। तथाहिताग्निः क्लिन्नं दारुनाभ्यादध्यात्। इत्याद्याहिताग्निव्रतानि चाम्नातानि। तथा
ऽग्निमत्तायां सिद्धायां अग्निहोत्रादीनि नित्यनैमित्तिककाम्यानि कर्माणि तत्र तत्राम्नातानि त
त्र कस्मिन्नवसरे आहिताग्निव्रतप्राप्तिः। कस्मिन्नवसरे अग्निहोत्रादीनामारंभ इति। तद्वि
वेकार्थमिदं सूत्रद्वयं। तत्र पूर्वेण सूत्रेण श्रुत्यादिभिः प्रकरणरहितैः पंचभिः प्रमाणैर्यावंतः पदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰पू॰१॰
॥४॥

र्थी आधानविधिना संबध्यंते तावत्सु समाप्तिषु आधानसमाप्तिः आधानसमाप्तौ वाहिताग्नित्व
तसमाप्तिरित्येतत्प्रतिपादयितुं पूर्णाहुत्यंतमित्युक्तवानाचार्यः उत्तरेण वाग्निहोत्राधारं प्रक्र
म्य प्रतिपादितवान्। यदि त्विष्टयः स्युः अग्नीनेवेति वाक्यशेषः। यद्यनधिकारत्वादाधानविधे
र्विनियोजकस्य प्रकरणस्य व्यापारासंभवादाधानांगमिष्टयो न स्युः। इष्टीनां चानधिकारत्वा
दिष्ट्यंगमाधानं न स्यात्तत्तथापि न कश्चिद्दोषः। अग्न्यर्थत्वेनैवोभयोरप्यनुष्ठानसिद्धेः। नन्वि
ष्टीनामग्निसंबंधाभावादग्न्यर्थता न संभवतीति चेत्। न। यदाहवनीये जुहोतीति। एवमादिभि
रग्निसंबंधोस्ति। न त्वेषसंबंधः साधनत्वेन न दूष्यते। तथाप्याहवनीयादिष्वग्निषु साध्यत्वबुद्धेर
नुवर्त्तमानत्वादन्यस्य च साध्यस्यानवगमात्। रात्रिसत्रन्यायेनाग्नय एवेष्टिभिः साध्या इत्येव
माश्रयितुं युक्तं। आनर्थक्याश्रयणादधिकारांतरकल्पनाश्रयणाच्चेति। तत्राधानेनेष्टिभिश्चा
ग्निसिद्धिर्भवति। न तयोरन्यतरेण। तेन सिद्धमग्निहोत्रादीनामग्निसाध्यानामिष्टिभ्य उत्तर
कालमेवारंभ इति। अस्मिन्नर्थे सूत्रयोजना। यथासामिष्टीनामाधानांगता न स्यात्तथापि आ
हवनीयाद्यग्निसंबंधात्तानेवाग्नीनिष्टयस्तनुयुः। विस्तारयेयुः। कुर्युः। साधयेयुरित्यर्थः। तुशब्द
स्तु साधनादिषु विशेषं दर्शयति। आधानेग्नीनां साध्यत्वेन संबंधानामेव साध्यत्वं। इष्टिषु साध
नत्वेन संबंधानामपि कल्पनागौरवभयात्साध्यत्वमिति विशेषं गृह्णीमः। एवं यथाधानेनेष्टिभि
श्चाग्नय एवान्नातः साध्या इति। अनधिकाराणां कथमनुष्ठानसिद्धिरिति न्यायविदामेष उपाल

॥५॥

60

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोनास्माकं। अस्माकं तु साध्यसाधनसंबंधे, वगते तद्दर्शिनां कर्तृत्वेनावगतानां ब्राह्मणादीनां क-
यंचिदधिकारकल्पनया अनुष्ठानसिद्धिः। अथवा नधिकाराणामनन्यशेषाणामपि तत्साधनसाध्य-
रूपेणोपकारकत्वेन कामं श्रुतिप्रयुक्त्यैव विधानामनुष्ठानसिद्धिरित्यलमिति विस्तरेण। प्रथमा-
याम०मानः। प्रथमायामिष्टौ द्वे देवते। अग्निः प्रथमः केवलः। द्वितीयः पवमानगुणको ग्निः। केव-
लस्याग्नेर्निर्देश एव। अग्न आयूं०षि पाः। एते द्वितीयस्य पवमानगुणकस्य। सहस्यवाळमर्त्यो० तृतीय-
तीयाः। सो विष्णुरुक्त्या याज्यानुवाक्ययोर्ऋचोरनेन संयाज्य इति संज्ञा नाविधीयते। सर्वत्र देवता०
पायः। सर्वत्रेति प्रकरणांतरे पीति दर्शयति। देवतागमः स्यात् समासनिर्देशास्य तुल्यत्वाद् देवतापाः।
देवतयोर्देवतानां वा आगमः स्यात् एवं भवति। नित्यानां प्राकृतीनामित्यर्थः। अपाय उद्धार इत्यर्थः। ए-
तदुक्तं भवति। विकृतौ देवतायाः एकस्या आगमे द्वयोर्बह्वीनां वा आगमेपि प्राकृतानां सर्वासामु-
द्धार इति। यस्यां पुनर्विकृतौ इष्टिचोदना रूत्वा देवतानां न विदधाति तत्र नोद्धारः प्राकृतीनां तत्र ता ए-
व देवता भवंतीत्यर्थः। यथाग्नेय इतः सोमेन पशुना इत्यपावेस्यादौ।। याः स्विष्टकृ० नै।। नित्यानामपाय
उक्तः। तत्र किं सर्वा नित्या उद्धर्तव्याः उत काश्चिद् देवतेत्येतं संशयं निवर्तयति। या आज्यभागौ स्विष्टकृ-
तं चांतरा देवता पशव्याः स्ता उद्धर्तव्याः। याः पुनर्विकृतौ विहितास्तास्तत्स्थाने उक्तानां प्राकृतीना-
स्थाने भवंतीति वचनात्। तदूर्मिकास्व भवंतीति गम्यते। एष समानः०र्मः। यो यत्रेति दिष्टो विधिर्दे-
वतास्यो न्यत्रापि स समानजातीयेषु भवति। समानजातीय एककार्य इत्यर्थः। द्वितीयस्यां वृधन्वं०

61

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०पू०वृ० स्तव॥एकः पावकगुणोऽग्निः अपरः शुचिगुणकः॥साकाग्निर्वा अमर्त्य इति देवा आवपेतेति वचनात्।
॥५॥ अधिके एते साग्निर्भिन्ने प्रभवतः। प्रथमस्यां द्वितीयस्यां तृतीयस्यामिति वचना। यस्यामिष्टेयपत्तंत्रे
विहितं तस्यामेकदेवतायामपि तंत्रं भवति। न यथोक्तनानादेवतायामेवेति। धाय्ये इ सुक्तं एते॰
वेहेति॥अग्नीषोमाविं॰भि॥त्रयाणामेकोऽग्रस्युते॥अदितिः। आदितिस्त्वान्या॥अस्यां दे देवते।
उत त्वामदि॰णीति। एषा कव्यजा प्रेऽजो भ ग्न॰योत्। इति॰स्त्रः। इत्येता स्विस्व इत्योनुक्रांता इत्य
र्थः। उक्तानुकीर्त्तनमुत्तरार्थं। यदाद्योत्तमे वेवस्यातामाद्यावेति पक्षस्तदापि तिसृणामिष्टीनां
यावत्यो देवतास्ताः सर्वा यष्टव्या इत्येवमर्थं॥आद्योत्तमपक्षे मध्यमायां ये देवते ते आद्यायामे
व प्रक्षेप्तव्ये। यदा पुनराद्यैव न दा सर्वा देवता आद्यायामेव प्रक्षेप्तव्या इत्येवमर्थं॥आद्योत्तमे॰
ता। इष्टी इति नो॰षः॥आद्या॰वा॥अद्यैव वेष्टिर्भवतीत्यर्थः। तथा स॰राजो। यदाद्यैव भवति तदा
द्वितीयतृतीययोरपि देवतास्तत्र भवंतीत्युक्तं। अतस्तस्यामेव धाय्ये विराजौ भवतः। धाय्या
विराजामनुप्रवेशस्य निमित्तं तृतीयस्या इष्टेर्देवतानुप्रवेश इत्येवमर्थं तथा सतीत्युक्तं। इति
मात्रे विका॰तीयाः। पौर्णमासतंत्रायामिष्टौ धाय्या विराण्मात्रे विकारे सति सेष्टिर्वैराजतंत्रे
ति वेदितव्या॥आधानाद्दा॰भजस्वाः। अत्राधानमिष्टीस्त्रोत्का। आधानादूर्ध्वं द्वादशरात्रमज
स्वा इत्युक्तं। तस्यायमभिप्रायः। यावता कर्मसमुदायेनाग्नीनां सिद्धिर्भवति तावतः कर्मसमु ॥५॥
क दायस्याधानशब्दो वाच्य इति ज्ञापयितुं। तेनाग्न्याधेयपुनराधेयवा। इत्यत्र सेष्टिकस्याधा

62

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नस्य ग्रहणं भवतीति सिद्धं। आधानेनेष्टिभिश्च सिद्धा अनयोर्द्वादशाहोरात्राणि सर्वस्वरूपे
णैव धार्येते। एतदजस्रधारणमग्निहोत्रपूर्वमाधाने भवति। अग्निहोत्रस्यैवानंतरमुच्यमान
त्वात्। अनुष्ठानक्रमेणैव कर्मणां व्याख्यानमित्युक्तत्वाच्च। इष्टिपूर्वे च सोमपूर्वे च नगास्त्रांतराण्य
न्वेष्यविचारणीयं। तत्रायं विचारः। इष्टिपूर्वेऽजस्रधारणं नास्ति। आपस्तंबवचनात्। अन्यमाह
वनीयं प्रणीयाग्नीनन्वादधातीति। इष्टपर्यंतयाऽन्यस्य प्रणयनस्य विधानात्। अपवृज्याग्नी
न्नेते पौर्णमासेन यजेत इति अपवर्जनविधानाच्च। तथा सोमपूर्वेऽपि नास्ति। तस्मादीक्षितो द्वा
दशाहं भृतिं तन्वीतेति। प्रसूतो द्वादशरात्रीर्दीक्षानियमादुपसद्भिः सुत्यया च सह षोडशाहानि प्रवृ
त्तेः कालः। अजस्रधारणं तु द्वादशाहपरिच्छिन्नं। सोममध्ये विहरणस्य चासंभवः। दीक्षणीया
संस्कृतेष्वग्निषु सोमयागविधानात्। अत इष्टिपूर्वे सोमपूर्वे चाऽजस्रधारणं नास्तीति सिद्धं।
अग्निहोत्रपूर्वेऽपि यदा वीनिष्टिकाले द्वादशाहानि न पूर्यंते तदा कथं। तत्रैते पक्षाः। अजस्रवि
च्छिकरणं इष्टिलोपः। यथासंभवमजस्रधारणं। अजस्रलोप इति। तत्र यथासंभवमजस्रधार
णपक्षो दुराश्रयः। तथाविध्यभावात्। द्वादशाहकालविशिष्ट एवासौ विधिः श्रूयते। नान्यकाल
विशिष्ट इति। तथेष्टिलोपपक्षोऽपि न संभवति। अग्निमत्तायां सिद्धायां पौर्णमासकाले आगते
तदनारंभे प्रमाणाभावात्। अक्रियायां प्रायश्चित्तोपदेशाच्च। एवं चेदजस्रे षष्ठ पौर्णमासोऽभव
तु को दोषः। उक्तो दोषः। स्वार्थ एव प्रणीतेन्वाधानदर्शनात्। अपवर्जनविधानाच्चेति। नन्वग्निहो
त्रमपि स्वार्थ एव प्रणीत आहवनीये भवति। अर्थायार्थायाग्निं प्रणयतीत्यस्याविशिष्टत्वात्। सत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हृ०पू०र० ॥६॥

मविन्निःसंति। न चाप्याधानानंतरं धारणविधेः प्रवृत्तत्वात्। न दर्शस्थेष्वेवाग्निष्वग्निहोत्राधिकारस्य
जातस्य त्यागे प्रमाणाभावात्। तेष्वेवाग्निहोत्रहोमो युक्तः। एतमेव न्यायमनुसृत्योक्तं भगवता
पस्तंबेन। द्वादशाहमजस्रेष्वग्निषु यजमानः स्वयमग्निहोत्रं जुहुयादिति। न चाप्रणीते चेद
ग्निहोत्रकाले एतस्मिन्नेवाग्निहोत्रं जुहुयात् एवमन्यत्रापि प्रक्रांतेनं त्र इति। अग्निहोत्रस्या
न्यार्थेष्वपि प्रवृत्तिदर्शनान्नात्रायं दोष इति गम्यते। अतः अग्निहोत्रस्यान्यार्थेष्वपि प्रवृत्तिदर्श
नात्। आधानानंतरमग्निहोत्रस्यानन्यार्थाहवनीयासंभवादजस्रेष्वेवाग्निहोत्रहोमो न विर
ध्यते। पौर्णमास्याः पुनर्दर्शं द्वादशाहोत्तरकालवर्त्तिन्यास्वार्थाहवनीयसंभवादजस्रेषु तस्याः
प्रवृत्तिर्विरुध्यते। अतोऽजस्रेष्विष्टिकरणमित्ययमपि पक्षो न संभवति। न चाजस्रलोपपक्षे
प्याधानाद्वादशरात्रमजस्रा इति। नित्यवदाम्नानं विरुध्यते। अस्यनित्यत्वासंभवात्। उक्तं
हि। इष्टिपूर्वं सोमपूर्वं वा प्रवृत्तिकरणामिति। तस्मादस्य विध्यंतरानुपरोधेन प्रवृत्तिदर्शनात्।
अकरणेऽप्रायश्चित्ताम्नानात्। अस्मिन्विशेषयेऽजस्रलोप एव श्रेयानिति वक्तुमुक्तं॥ अजस्रं तं
तु गतं०यः॥ अजस्रं तं यावज्जीवमित्यर्थः। गतश्रियस्त्वायावेगतश्रियुरिति श्रुता वक्ताः। गतश्रि
याम्यत्येयो यावज्जीवमजस्रा भवंति। न द्वादशाहमेवेति॥ १॥ उत्सर्गेपराह्णे गार्ह० हरेत्।
उत्सर्गोऽजस्रोत्सर्गः अग्निहोत्रहोमार्थं विहरेत्। नाजस्रेषु। होमस्त्वजस्रेष्वपि भवतीत्युक्तं। ॥६॥
एवं स्थिते विहरणसहितमग्निहोत्रहोमप्रयोगं वक्तुकाम उत्सर्गः। इत्युक्तवान्। अत्रापराह्ण
शब्देन अह्नश्चतुर्थभागो गृह्यते। विहरणकाले गार्हपत्यं प्रादुष्कृत्य प्रज्वाल्य च दक्षिणम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्निं वैश्यगृहादानयेत्। चतुर्णां वर्णानां अन्यतमस्य बहुपशोर्वा गृहात्। गार्हपत्याद्वा। धार्यश्चेत्स
ज्वलयेत्। काले काले यदि निर्मथ्यस्तदा मंथेत्। एषां प्रकाराणामुत्पत्तिवर्गो व्यवस्था। तेषामन्य
तमप्रकारेण दक्षिणाग्निं साधयित्वा ततो गार्हपत्यात् ज्वलंतमग्निमाहवनीयार्थमुद्धरेत्। प्रा
ग्रातरेण पृथक्कुर्यादित्यर्थः। देवं त्वा देवेभ्य० उद्धरेत्। अनेन मंत्रेणाग्निहोत्रार्थमुद्धरेत्। पूर्वस्यो
द्धरेदिति वचनस्येदं प्रयोजनं। गार्हपत्यं प्रज्वल्य तस्मादाहवनीयं ज्वलंतमुद्धरेदित्येतस्य मंत्रव
र्जितोद्धरणप्रकारस्य सर्वार्थत्वज्ञापनं। एवं सर्वार्थमुद्धरणं विदधता एतत्साधितं भवति। येना
ग्निना यत्र प्रयोजनं तत्र तस्योद्धरणं कर्त्तव्यमिति। शास्त्रांतरे स्पष्टवचनमस्ति। अर्थायार्थाया
ग्निं प्रणयतीति उद्धरणमंत्रो यमग्निहोत्रे एव नान्यत्रेति सिद्धं। उद्ध्रियमाणा उ० इति प्रणयेत्।
प्रणयेत्प्राङ्गुत्येत्। अग्निमाहवनीयं प्रत्यनेन मंत्रेण। अमृताहुतिम० भिमुखः। आदित्याभि
मुखो भूत्वाऽनेन मंत्रेणाहवनीयायतनेऽग्निं निदध्यादित्यर्थः। एवं प्रातर्युष्मा० मेवाभिमुखः।
एवमेव प्रातर्होमार्थमप्यादित्याभिमुखो निधानं तत्कुर्यात्। तमेवाभिमुखो निधीयमानमाहवनी
याभिमुख इत्यर्थः। एवं सति प्रातःकाले आहवनीयायतनात्पश्चात्स्थितेन निधानं भवति। सायं
तु पुरस्तात्स्थितेन व्युष्टायामुषसि उदितायामादित्योदयात्प्राक्। रात्र्यायदेन० येत्। प्रणयन
मंत्रे अन्नायदेन इत्यस्य स्थाने रात्र्यायदेन इति कर्त्तव्यं प्रातःकाले। अत ऊर्ध्वमाहि० मा। त्रासत्रिध
र्माश्चातुर्मास्यव्रतान्यत्र व्रतशब्देनोच्यते। विहरणादूर्ध्वमग्निहोत्रहोमप्रयोगसमाप्तेर्व्रतचारी
भवत्याहिताग्निः। अनुदितहोमी० तहोमः। अनुदितहोमी चेत्समाप्तेपि प्रयोगे उदयाद्व्रतचारी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰ १०२॰
॥७॥

र्भवेत्॥ अस्तमिते होमः कर्त्तव्यः॥ अंगान्यपि प्रधानकाले कर्त्तव्यानि॥ यस्तु नरं गं विहरणवत्त्वकाले ए
व कर्त्तव्यं॥ नित्यमाचं॰ना॥ उक्तं धाअुरवस्याचमनं पुरस्तात्तदिदानीं कर्त्तव्यमस्यां गताय॥ अतस
त्याभ्यां॰ दकमादाय॥ पर्युक्षणमंत्रोपि जपित्वा पर्युक्षेदिति पृथक् क्रियते॥ पर्युक्षणातिदिष्टपरि
समूहने मंत्रोऽस्मादिति॥ त्रिरेकैकमित्येतावतैव एकैकस्याग्नेस्त्रिस्त्रिः पर्युक्षणे सिद्धे त्रिस्त्रिरि
ति वीप्सावचनं मंत्रस्यापि त्रिरावृत्तिर्भवतीत्येवमर्थं॥ पुनः पुनरुदकमादायेति वचनं न सकृ
द्गृहीतेन त्रिः पर्युक्षेदित्येवमर्थं॥ आनंतर्ये विकल्पः॥ अग्नीनां पर्युक्षणादिषु कर्त्तव्येषु केनानुक्र
मेण कर्त्तव्या इत्यानंतर्यविशेषज्ञातयेऽनेन सूत्रेणाग्नीनामुत्पत्तिक्रमस्य होमक्रमस्य च विकल्पो
विधीयते॥ दक्षिणेनैव प्र॰ पर्युक्षेत्। पर्युक्षणेऽयमेव क्रमः। दक्षिणाग्निर्गार्हपत्यमाहवनीयमि
ति। तत्र श्रुतिमेव हेतुमुपन्यस्यन् तस्मादेवं पर्युक्षेदित्युपसंहृतं। तेन पर्युक्षणातिदिष्टपरिसमूह
नेऽयमेव क्रमः। अन्यत्र पूर्वोक्तो विकल्पः। अत्र विनिवेशः। प्रधानात्पूर्वेषामुत्पत्तिक्रमः। परेषां प्रधा
नक्रम इति। गार्हपत्याद्दक्षि॰नीयात्। अयमाकारामर्यादायां॥ अग्न्युपघातविरोधात्॥ पश्चाद्गार्ह
पत्य॰ष्वपेति॥ पश्चाद्गार्हपत्यस्य तूष्णीमेव दक्षिणोत्तरिणोपस्थेनोपविश्य गार्हपत्यात्कतिपया
नंगारादनुदक्पृथक्कुर्यादधिश्रयणार्थं॥ तेष्वग्निहोत्रं॰ हि रुरुते॥ नेष्यति पृथक्कुरुते तेषु गार
क्षित्यर्थः॥ अग्निहोत्रमिति होमसाधनभूतं द्रव्यमुपचर्यते॥ इत्वा॰वा॥ अनेन वा मंत्रेणाधिश्रयेत् ॥८॥
पूर्वेण वेति विकल्पविधिः॥ न द्रव्याधिश्रये॰ त्येके॥ अनधिश्रयेन्न वेत्येतावतैव सिद्धे गुरुसूत्रकरणं
स्यायविकल्पोऽयमिति प्रदर्शनार्थं अत्रेके आचार्याः प्रवृत्तिपरत्वाच्छास्त्रस्य कार्यस्य चानीप्सित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वाद्दल्लोपमाहुः। आचार्यस्तु कार्यार्थत्वात्प्रवृत्तेः। कार्यस्य च दृष्टस्य संयोगप्रमाणाभावात्। तद्दत्त्यागे
संस्कार्यस्वरूपविनाशात् संस्कार्यसंबंधे वृत्तात् संस्कारस्य लोप एवात्र श्रेयानित्याह॥ पयसा नित्यः॥
नित्यश्चासौ होमश्च नित्यहोमः स पयसा कर्त्तव्यः। अकामस्याग्निहोत्रहोमः पयसा कर्त्तव्य इत्यर्थः।
कामानुपदेशाद् देवास्य नित्यत्वसिद्धेर्नित्यग्रहणमुत्तरार्थं॥ यवागूरोदनो॰स्कामानां॥ यथासं
ख्येन ग्रामकामादीनां यवाग्वादीनि अग्निहोत्रद्रव्याणि भवंति। ग्रामकामः प्रसिद्धः। अन्नं च तद्रा
द्यं च अन्नाद्यं। खाद्यान्नकाम इत्यर्थः। इंद्रियं शुक्रं च सुरादीनि च। तेजस्वि॰विः। नित्यहोम इत्यत्रा
पि संबध्यते। तेन पुरुषार्थैरपि क्रियमाणो होमो नित्य एव स्यात्। कामार्थः होमाश्रितानि द्रव्याण्ये
व काम्याश्रितानि भवंतीति॥ अनधिश्रितमन्येत्॥ अनधिश्रितग्रहणात् अनधिश्रितमात्र एव। अवज्व
लनेन कालविक्षेपः कर्त्तव्य इत्यवगम्यते॥ अनधिश्रयं॰षीति॥ न अधिश्रयो यस्य तत् अन
धिश्रयं। अधिश्रयरहितं अपि दधि अवज्वलयेदित्यर्थः। सर्वत्रावज्वलनं मंत्राय अग्निष्टे तेज इति।
दधिवेत्यतानतेव सिद्धे गुरुसूत्रकरणं दध्यादीनामपक्वानां जिह्यादीनां च संग्रहार्थं। स्रुवेण प्रति॰
नवा॰नीति॰सीति॥ पयसा होमे दोहनपात्रप्रक्षालनेन स्रुवेन आनीयतेन प्रतिषिंचेत्। अग्निहोत्रद्र
व्यं अन्यत्रोदकेनेव। नीति रितिमंत्रेण। न वा प्रतिषेकः कर्त्तव्यः। तयोर्व्य॰चारः। तयोः प्रतिषेका
प्रतिषेकयोरित्यर्थः। अव्यतिचारासंकर एकस्मिन्पुरुष इत्यर्थः। एकः सर्वदा प्रतिषिंचेत्। अप
रः सर्वदा न प्रतिषिंचेदित्यर्थः॥ पुनर्ज्वलतापं॰यरति॥ पुनर्वचनार्थेनोल्मुकेन अवज्वलनं कृतं ते
नैव परिहरणं कुर्यादिति गम्यते। उल्मुकादानं गार्हपत्यादेव। न श्रपणार्थं। श्रपणार्थः पृथक्
कृतस्य पुनः प्रक्षेपविधानात्। अन्यत्र कार्यार्थं पृथक्कृतस्य कार्यपरिसमाप्तौ त्याग एव कर्त्तव्यः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृ॰ पू॰ र॰

॥८॥

तेनावज्वलनार्थं पथकृतं अवज्वलनेकृते प्रयोगावनिभायते नैव परिहरणमपि कृत्वा सृजेत्॥ समुदं
तं०दधत्॥ समुद्धृतः अन्तो यस्य दध्यस्य तत्समुदन्तं दध्य। परितस्फालीसंबंधप्रदेशोऽत्र स्रुच्यते। प
दापच्यमानपयस एवमवस्थं भवेत् तदाकर्षन्नियोदगुद्वासयेत्। कर्षनिवर्तिमदगत्येत्यस्यार्थः। निर
धादितित्रिभिर्मंत्रैस्त्रिर्निधानं कुर्वन्नेवनारयेत्। प्रथमद्वितीययोः श्यामाकाख्ये श्रुत्वा तृतीयेन मन्त्रस्य निद
ध्यात्॥ सुहुतकृतस्थ०० मा अरातयऽइति॥ अतिसर्गो गाराणां गार्हपत्यप्रदेशे पः। उत्तरतः स्फ्या०पीत॥
स्फ्यात्या उत्तरतः स्रुचमासाद्य स्रुवहस्त एव सन्नोमुन्नेयानीयमनेन मंत्रेण आहिताग्निमतिसर्जयेत्।
आहिता०सृजेत्॥ विहरणकाले एवाहिताग्निश्चाध्वर्युः पत्नी च स्नाता दम्पती तीर्थेन प्रविशन्ति।
तत्राध्वर्युर्विहरणं कृत्वा होमकाले प्राप्ते निष्क्रम्य प्राङ्मुख उदङ्मुखो वा दम्पती तीर्थेनैव प्रविश्य पर्युक्ष
णादि कुर्यात्। पत्नी तु गार्हपत्यस्य दक्षिणत आस्ते। आ होमपरिसमाप्तेः। आहिताग्निश्चाहवनीयवि
हरणकाले दक्षिणत उपविश्य उद्धराहवनीयमिति अध्वर्युसंप्रैषमुखमास्ते। ततो होमकाले प्राप्ते नि
क्रम्य प्राङ्मुख उदङ्मुखो वा दम्पती तीर्थेनैव प्रपया परेण वेदिदेशं पूर्वेण गार्हपत्यमुत्तरेण दक्षिणा
ग्निं च गत्वा वेदेर्दक्षिणत उपविश्य। उपविष्टः सन्नेतदतिसर्जनेन वा स्युत्तोमुन्नयसतिसृजेत्॥
अतिसृष्टो भरिष्यां०मुन्नयेत्॥ अतिसृज इति वचनं प्रवसति यजमाने स्वेनैवातिसृष्टमुन्नयेत्॥
नानतिसृज इत्येवमर्थः। चत्वार एते मंत्राः समवत्तात्संसर्गाणां अतश्चतुष्कृतमुन्नयेत्। स्रुवपूरमि
तिणमुल्प्रत्यययोगाच्च। अग्रियमग्रियमिति उन्नयनभेददर्वीनाच्च। स्रुवपूरमिति स्रुचं पूरयित्वा
पूरयित्वेत्यर्थः। अत्र पंचममंत्रस्याभावात् संचावत्तीनां तूष्णीमेव पंचममुन्नीयते पुरुषविशेषे धर्मत्वा
दवदानविशेषस्य संबंधस्य। अग्रियमग्रियं०त्राणां॥ यो यजमानः पूर्वजानुसारेण आत्मनः पुत्राणां

॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मक्षिता रम्येते मिच्छेत्। तस्य पूर्वः पूर्वः पूर्णतमो भवेत्। अनेन पुत्रस्यायं काम्यः कल्प्यः। न च तु पुत्र
स्यैव॥ यो स्य पुत्रः प्रियस्यात्तं॰ नयेत्। प्रावृता नामेव पंचानां चतुर्णां वा एकं स्रुवं प्रियं पुत्रं ध्या
त्वा पूर्णमुन्नयेत्। अयमपि काम्यः। अयमेकपुत्रस्यापि भवति॥ स्थाली मभिमन्त्रयस॰ दधेस्वा
हेति॥ स्थाल्याः स्रुवेण स्रुच्युन्नयं कृत्वा स्थालीमभिमन्त्र्य स्रुचा सह समिधं च गृहीत्वा। अध्यधिगा
र्हपत्यं गार्हपत्यस्योपरि समीपं हृत्वा आहवनीयस्य नेदीयसि नातिसिकासमितां हरेत्। हृत्वा तस्य
पश्चाद् दूरे कुर्वन् सूपसाद्य दक्षिणं जानुनिपात्य तां समिधमादध्यात्। रजतामिति मंत्रेण॥ समि
धमाधायेवि॰ स्वाहेति॥ समिधमाधायेस्रुच्यते। समिदाधानधर्मस्य जानुनिपातेनस्यानुवृत्त
र्थं। समिधमाधायस्येनेनैव समिद्ग्रहणेन पूर्वसूत्रे आदध्यादित्येवोक्तेपि समिधएवाधाने सि
द्धे यत्पूर्वसूत्रे समिद्ग्रहणं करोति तत्ज्ञापयति। यत्र यत्र समिधमादध्यात्तत्र तत्र आन्वाच्यादध्या
दिति। विद्युदसीत्यपउपस्पृश्य प्रदीप्तां समिधं मूलतो ध्रुं गुरुं मात्रे विजुहु पाहु। भूर्भुवः स्वरोमि
ति मंत्रेण॥ पूर्वामाहु॰ त्येति॥ हुत्वेति वचनं निपातितजानुरेवोत्तरमपि कुर्यादित्येवमर्थं। पूर्वा
मिति वचनं पूर्वाहुत्युत्तरकालीनेस्रुचं सादयित्वेव कुर्यात्। उत्तराहुत्युत्तरकालीनं स्रुग्घस्ते ए
व कुर्यादित्येवमर्थं॥ उत्तरां तूष्णीं प्र॰ नोवा॥ अत्यानंतर्यवचनेन पूर्वाहुत्योत्तराहुतेः से
वं धः क्रियते। तेन जान्वाच्येस स्यानुवृत्तिर्लभ्यते। प्राधान्यं चोत्तराहुतेः। अतः पूर्वाहुतोहुतायां द
व्यदोषे सति उत्तराहुत्यर्थं द्रव्यमुत्पादयितव्यमेव। प्रयसी पूर्वाहुते र्यद्वा यो द्वयं। असंसृष्टां पूर्वपा
रुत्या प्रागुदक्पूर्वाहुतेरुत्तरतो वा नेस्याएव॥ प्रजापतिं म॰ सर्वत्र॥ यत्र तूष्णीं व्याहृतिविनियोग होम श्रो
यते तत्र प्रजापतिं देवतां ध्यायेत्। देवतां सोध्यात्वा होमस्य। ध्यानत्वादेवमानसत्वे सिद्धे मनो ग्रहणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०पू०र०
॥१॥

राद्ध्यानार्थं। तेन चतुर्थ्यंतं प्रजापतिग्रहं ध्यात्वा तदनंतरं स्वाहेत्युपांशूक्त्वा जुहुयात्। होमेष्विति
बहुवचनादेव प्रकरणादुत्कर्षसिद्धेः सर्वत्र ग्रहणं गोत्रेष्वपि प्रापणार्थं॥ भूयिष्ठं स्रुचि० स्वेति॥ उत्तरा
हुते भूयिष्ठं भूयो द्रव्यं पूर्वाहुते भूयिष्ठं यथा भवति तथा भक्षार्थं स्रुचि शेषयेत्। पूर्वाहुत्यर्थं प्रक्षिप्ता
द्व्याउत्तराहुत्यर्थं भूयो भवति। तस्मादपि भूयो भक्षार्थं भवति। न पूर्वाहुत्यपेक्षया भूयिष्ठमित्युच्य
ते। भूयिष्ठं द्रव्यं स्रुचि शेषयित्वा स्रुचमेवाहुतिदेशाग्रस्य प्रकंपयेत्। ततः स्रुग्गतलेपं पाणिनाऽधो
मुखेनावमृज्य पाणिगतं लेपं कुशमूलेषु निमार्ष्टि निमृजेत्। पशुभ्यस्त्वेति॥ तेषां दक्षिणतः० निनी
य॥ तेषां कुशमूलानां दक्षिणत उत्तानाऽङ्गुलीर्निदध्यात्। प्राचीनावीती भूत्वा स्वधापितृभ्य इ
ति मंत्रेण वा। अपो वनिनीयेतावदेव सूत्रे अप श्व कुशमूलानां दक्षिणतो निनयेत्। अवाचीने
न पाणिना। एतावत्स्रुग्घस्त एव करोति। एवं वा। तेषां दक्षिणतः करोति प्राचीनावीती निनीय।
वृष्टिरसी० स्पृश्य॥ इदमपि सूत्रमेतावदेव। निधाय स्रुचमपस्पृश्येत्। आहिताग्निर० यत अधि
कारोषं॥ आधानमु० धं॥ समिदाधानमंत्रेण तेन ऋषिणोस्यनेन मंत्रेण च समिधमाधीयमाना
मनुमंत्रयते। ता अस्य सूददो० हुतिं॥ एतयर्चा पूर्वाहुतिमनुमंत्रयते। उपोत्थायोत्तरां० पोषैः॥
इतिकाराध्याहारेण सूत्रे छेदः। उत्तराहुते हूयमानाया देशतः कालतश्च समीपे स्थित्वा कृत्य
क्षेणे क्षमाणास्तामेवाहुतिमनुमंत्रयते। कौक्षसैतन्नारः कस्या सेव चनः। केचिदुत्तराहुतिमीक्ष
माणोनुमंत्रयते। तन्मंत्राभिहितान्कामान्कांक्षेत चेति वर्णयंति। आग्नेयी० स्व॥ याभिः का
पिस्वश्रवराभिराग्नेयीभिरुत्तरामेवाहुतिमनुमंत्रयते। अग्न आयूंषि० स्वभिः॥२॥ संवत्स
रे०रे॥ पूर्णपूर्णे संवत्सरे एताभिरधिकाभिः सकृदनुमंत्रयेत॥ यवाग्वापे० र्वणि जुहुयात्॥

॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा ग्वापयसा वा स्वयं पर्वणि पौर्णमास्यां अमावास्यायां च सायं प्रातर्यजमानः स्वयमेवाग्निहो
त्रं जुहुयात्। अस्मिन्सूत्रे पर्वणि इत्य नियमः। स्वयं कर्तृनियमश्च विधीयते। स्वयं होमे समिधमनु
मंत्र्य विधुदसीति पूर्वामाहुतिमनुमंत्र्य पश्चान्मे यच्छेत्युत्तरामाहुतिमनुमंत्र्य वृष्टिरसीत्येवं क्रमो
भवति। यत्किंचिदग्निहोत्र द्रव्यं काम्यं वैकल्पिकं वा प्रयुज्यते सायमुपक्रम्य प्रातरप्येवं प्रयुज्यते।
नान्यथेति। प्रतिनिधिस्त्वेकप्रयोगपर्यवसाय्येव॥ ऋत्विजामेकं० कालं॥ ऋत्विजामेकः कश्चि
दत्विग्गिनरस्मिन्काले ऽग्निहोत्रं जुहुयात्॥ अंते० वा॥ इतरस्मिन्काले ऽग्निहोत्रं जुहुयादिति शेषः।
अंतेसमीपे वसतीत्यंतेवासी स पुनः पुत्रः शिष्यो वा। अत्र किंचिदुच्यते। ऋत्विजः त्रिविधाः देव
कृताः पितृकृता मनुष्यकृता इति। ये कर्मणि कर्मणि ध्रियंते देवकृताः। येन्वयागताः परंपरागताः
ऋत्विजस्ते पितृकृताः। ये त्वेकस्य पुरुषस्य सर्वाणि कर्माणि कर्तुं ध्रियंते ते मनुष्यकृताः। तत्र यस्या
हिताग्नेः पितृकृता मनुष्यकृता वा ऋत्विजः संति तेषामृत्विजामेकः कश्चित्। पर्ववर्जितेषु काले
षु जुहुयात्। यस्य देवकृतास्तस्यांतेवास्येवेति विनिवेशः॥ स्पृष्ट्वोदकं० येत्॥ उक्तमेवोपस्पर्शनं
कृत्वा उदगावर्तस्रुगांतं शेषं भक्षयेत्। उक्तसंकीर्तनमाहिताग्न्यधिकारे सत्यपि होमकर्तृप्रापणा
र्थं। अपरयो० ता॥ भक्षयेदिति शेषः॥ आयुष्टेला० स्युत्तरं॥ प्रथममुत्तरमिति भक्षयोः संबंधकर
णार्थं। तेन उत्तरस्यापि मंत्रस्य प्राप्त्यामंतता भवति। तूष्णीं समिधमा० हीं परो। जुहुयादित्यध्याहा
रः। तूष्णीं ग्रहणमाहवनीये समिदाधाने होमे च यथा धर्माः। जानुनिपातनं प्रदीप्ताग्नि होमो द्व्यंगुल
मात्रोग्निहोमश्च तेषां प्राप्तिसूचनार्थं॥ निखो० रा॥ उत्तराहुतिं तूष्णीं भूयसीमित्येवमुक्तं स्यर्थः॥
तूष्णीं समि० तिदक्षिणे॥ अग्नये त्वा० येस्वाहेति वा॥ मंत्रविकल्पो यं। निखो त्तरागतार्थमेतत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रू० पू० श०
॥१०॥

भक्षयित्वाग्न्या० हेति॥ भक्षयित्वेतिवचनं भक्षणानंतरमेव निनयनमपि स्यादित्येवमर्थं॥ अग्न्यात्म
मपः स्रुवाग्निनयनं इति। असंस्कारकर्मत्वान्मंत्रोपि त्रिरावर्त्तते॥ अग्नयेनाकुरो० नेप्रयः स्वाहेति॥ अग्नये
स्वप्न्यात्म निनयनानंतरमेव इदमपि कर्त्तव्यं इति दर्शयति। एनां स्रुचमित्यर्थः। विहारस्य प्रागुदग्दे
शे पूर्णाः स्रवतस्तः स्रुचो निनयेत्। एकैकेन मंत्रेणैकैकामिति॥ पंचमी कु० हेति॥ पंचमीं षष्ठीमिति
पूर्णाः स्रुकसंप्रत्ययार्थं॥ प्रताप्यो० व्यात्॥ प्रतपनमाहवनीये अंतर्वेदिग्र इत्समन्वयात्। प्रताप्य
स्रुचमंतर्वेदिदेशे निदध्यादित्युक्तं॥ परिकर्मि० प्रेत॥ परिचारकः परिकर्मीत्युच्यते॥ अग्रेणाहव०
र्न्न॥ पूर्वेणाहवनीयं विहारस्य दक्षिणदेशं गत्वा तस्य तस्याग्नेर्दक्षिणत उदगग्रं स्वस्ति छंदति स्वःस्ति
स्वः समिध आदध्यात्। पुनः प्रत्येत्य पर्युक्षणादि कुर्यात्। प्रथमांस० त्रां॥ स इत्यमंत्रेणेति परिभाषा
प्रधानकर्मसु न प्रवर्त्तत इति कृत्वा प्रथमांसमंत्रामित्युक्तं वा नाचार्यः॥ अग्राहवनीये दीदिहीति० ये
ति॥ सर्वे स्वाहाकारांताः कर्त्तव्याः॥ उक्तं प० णं॥ यदुक्तं पर्युक्षणं तदिहापि कर्त्तव्यं॥ ताभ्यां परि० हे
न॥ पूर्वोक्तमिदं च द्वे पर्युक्षणेनाभ्यां परिसमूहने व्याख्याते इति। धर्मातिदेश एकोर्थः। परिस
मूहने इति योगविभागात्स्वरूपसिद्धिश्च भवति। मंत्रस्तु जपितेति पृथक्करणेन भवति लि
गाभावाच्च॥ पूर्ववत्तु प० त्॥ यद्वे परिसमूहने पर्युक्षणधर्मके विहिते तयोरनेन क्रमो विधीयते।
पर्युक्षणाभ्यां पूर्वं परिसमूहने भवत इति॥ एवं० तः॥ सायंकालेग्निहोत्रविधिरुक्त एवं प्रातः
कालेपि होमः कर्त्तव्य इत्यर्थः। तत्र विशेषमाह॥ उपोदयं व्यु० दिते वा॥ उपोदयमादित्योदयस
मीपमित्यर्थः। व्युषिते उषस्युदित इत्यर्थः। उदित आदित्यमंडले दृष्टे उदित इत्यर्थः। एते त्रयः प्रा
तर्होमप्रधानकालाः। तत्रायं व्युपोदयमुदित इत्युच्यते। उदित आदित्ये सति उदयसमीप इति कृ

॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्यांपदाभ्यामेक एव कालो विहितः स्यात् । तद्भ्रांतिनिरासार्थं । व्युषितमात्रात्सूर्यं उपोदयमात्रं दपहित
वानाचार्यः । एतेषु त्रिषु कालेषु प्रधानं यथासंपद्यते । न त्वंगानामेवोत्कर्षो । पकर्षो वा द्रष्टव्यः ॥ सत्यव्र
ताभ्यां० जनं च ॥ एते प्रातर्होमे विशेषाः ॥ ३ ॥ प्रवत्स्यन्नग्नीन्० ष्ठते ॥ यस्मिन्ग्रामेग्नय आसते तस्मात्प्र
देशाद्ग्रामांतरे एकरात्रावमोवासः प्रवासः । तं करिष्यन्प्रवत्स्यन्भवति । अग्नीनिति बहुवचनात्सर्वा
न्विहृत्य प्रज्वलयेत् । प्रज्वल्याचम्य । तीर्थेन प्रपद्य अतिक्रम्य अग्नीनुपतिष्ठते । अतिक्रम्येति अव्य
क्तोपस्थानदेशमतिक्रम्य समीपं गत्वा तं तमग्निमुपतिष्ठत इत्यर्थः । इदं कर्माहिताग्निः स्वयमेव
कुर्यात् । इदमनेनेत्याह ॥ आहवनीयं त्रूंस्य पशून्० पनादिति ॥ दक्षिणाग्निमुपस्थाय तत्रैव तिष्ठ
न् । गार्हपत्याहवनीयावीक्षेत । इमान्मे मित्रावरुणाविति उत्तरत्रयपठितं प्रसेति वचनात्तत्रैव तिष्ठ
न्नीति लभ्यते । द्विवचनलिंगात् युगपदेवेक्षेत ॥ यथेतं प्रत्ये० न इति ॥ आहवनीयमुपस्थाय उत्तर
णा विहारं गत्वा गार्हपत्यस्य प्रत्यगुदग्देशे ०स्थं तत्समीपं गत्वा तमुपस्थाय तद्देव स्थित्वा दक्षिणा
ग्निमुपस्थाय तत्रैव तिष्ठन् गार्हपत्यमाहवनीयं चेक्षणं कृत्वा पुनस्तेनैव मार्गेणाहवनीयसमीपग
त्वा । ततः प्रदक्षिणमावर्त्तमानः आहवनीयमुपतिष्ठते । मम नाम प्रथममित्यनेनेन मंत्रेण ॥ प्रव्रजे
दनवेक्ष० पन् ॥ एवं तोग्नीनीक्षमाणो मा प्र गामेति सूक्तं जपन्पथं गच्छेत् । सूक्तग्रहणमन
भ्यासार्थं ॥ आरादग्निभ्यो० जेत ॥ अग्निभ्यो दूरं गत्वा वाचं विसृजेत । यावदंतेग्न्यागारं दृदिर्न
दृष्टं तावदत्र आराद्दूरे नोच्यते । अत्र वाग्विसर्गविधानादितः प्राक् वाग्यत एव सर्वं कुर्यात् ॥
सदासुगः० स्था ॥ ब्रूयादिति शेषः । योऽभिलषितदेशंगामी पंथाः स्तो प्राप्येत्यर्थः । अनुपस्थिताननु
पस्थाय ॥ यदि कदाचिद्यथोक्तोपस्थानं न कृतं वा न स्यात् तदैवान्मानुषाद्वा निमित्तात्तदान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्०वृ०२०

॥५३॥

वैवस्थितउद्दैवसंनिस्यनेनमंत्रेणानुत्पत्तिक्रमेणततमग्निंध्यात्वा।तांतांदिशमभिमुखमुपस्थाप
गच्छेत्॥अपिपंथामग०त्येय॥ब्रूयादितिसूत्रार्थः।प्रवासंकृत्वाप्रत्येत्यस्वग्रामसमीपंप्राप्य॥अपिप
थामगन्महीतिब्रूयात्॥समित्पाणिर्वा०रण्यात्सृजेति॥वाग्यतःसमिधोगृहीत्वापुत्रेणाग्निष्वेव
वापूर्वप्रस्थापितेनाग्नीन्विसृज्यतान्ज्वलतस्वज्ञात्वास्वयमाहिताग्निराचम्यशुचिर्भूत्वातीर्थेनि
अपथाव्यक्तदेशाद्स्यंतसमीपदेशेअतिक्रम्याहवनीयमीक्षेतविश्वदानीमितिद्वाभ्यांमंत्रा
भ्यां॥अग्निषुस०छत॥ममनामम०इति॥इदानीमानीताःसमिधोविभज्यतस्यतस्याग्नेःस
मीपेनिधायाततआहवनीयमुपतिष्ठेत।ममनाममतवचेसनेनमंत्रेण॥ततःसमिधोग्न्याद्ध्यात्।
उपनिहिताएवास्मिन्ननेनेस्वाहा।आहवनीयेअग्न्मविश्व०यनादिति॥दक्षिणाग्निसमीपेस्थि
तरसुक्तं॥यथेतंप्र०त्य॥परिसमुह्योदग्विहारादुपविश्यपर्भुनःस्वरिनिवाचंविसृजेत।पर्भु
वस्वरित्यनेन।यथेतंप्रसेत्य।सर्वस्याविहारस्यपरिसमूहनेसत्वातस्मात्तरतउपविश्यवाचं
विसृजेत्।अत्रसत्यतिप्रवासनिमित्तेएवंप्रयोगक्रमः।सतितुनिमित्तेयथेतंप्रत्येत्यनेमित्तिकंकृ
त्वापरिसमूहनवाग्विसर्गौकुर्यात्।एवमेवसूत्रस्वरूपंविविच्यं॥प्रोष्यश्रेयो द०नस्वाहेति॥दशा
रात्रादूर्ध्वंप्रवासंकृत्वाजुह्वांचतुर्गृहीतंगृहीत्वा०नयाजुहुयात्।मनोज्योतिरित्येतयर्चा।चतुर्गृ
हीतग्रहणादेवआज्यद्रव्यसिद्धेःसत्याआज्यग्रहणंतूष्णीमुत्पवनस्यप्राप्त्यर्थं॥अग्निहोत्राहो०च॥
अग्निहोत्रहोमविच्छेदेचेतामाहुतिंजुहुयात्।विच्छेषाभावात्।एकस्यद्वयोर्बहूनामपिविच्छेदए
षेवप्रायश्चित्तिःकार्या॥प्रतिहोमं०के॥चतुर्दोत्राव्याहार्यः।एतामाहुतिंहुत्वाप्रतिहोमंचकुर्या
दित्सर्थः।प्रतिहोमोनामयावंतःकालाहोमेनविच्छिन्नास्तावतामेकैकंकालंप्रत्येकैकोहोमःक

॥५१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्न्यरति। एवंपरिसमुह्येसादि सर्वमेव व्याख्यातं॥ परि०त॥ गृहानीक्षेता प्र० वीक्षमाणः॥ ईक्षणं
प्रपदनं चानाहिताग्निरपि कुर्यात्॥ गृहामा बिभीतेति ईक्षेत। गृहानहमितिप्रतिपद्येत। प्रतिपद्यमा
न एवं प्रपद्येत। त्रीवं ऊर्गं मंवीयोः गृयो रिति त्रिरनुवीक्ष्यमाणः। अनुवीक्षमाणमनुमंत्रणं मंत्रेण
प्रकाशनात् तस्य नमंत्रेण विना कर्त्तुं नशक्यइति। मंत्रोपि त्रिरावर्त्तते॥ विदितमप्यली०येयुः॥ अ
लीकमप्रियं अवगतमप्रियं प्रवासादागतस्य तस्मिन्नहनि ननिवेदयेयुः॥ विज्ञायते। भयं वो०
हवेति॥ वाङ्म रक्षश्च नार्दस्यार्थे। अभयं वदस्मनेन मंत्रेण। प्रवत्स्यन् प्रवासादागतश्चाहरहरग्निहो
त्रे होमे चोपतिष्ठेतेति। श्रुतिरेवोपन्यस्ता विज्ञायत इति। अस्मिन्पक्षे प्रयोगक्रमः। विहृत्य प्रज्वाल्या
चम्य तीर्थेन प्रपद्य तत्रैव स्थिता सर्वानग्नीन्सकृदेवोपस्थाय। अभयं वदस्मनेन मंत्रेण। प्रदक्षि
णमावृत्य तीर्थेनैव निष्क्रम्य मा प्रगामेति जपन् प्रव्रज्य सदा सुग इति पंथानं प्राप्य ब्रूयात्। प्रवेश्य
अपि पंथामित्युक्त्वा। विहृतांज्वलितान् तीर्थेनैव प्रपद्य तत्रैव स्थिता। अभयं वदस्वेपस्थाय प
रिसमूहनादि शेषं पूर्ववत्। अतिप्रतिवासोस्ति चेत्तस्य नैमित्तिकमपि कुर्यात्। अग्निहोत्रहोमे
च दक्षिणाग्निहोमानंतरं। अभयं वदस्मे उपतिष्ठेत। पूर्वोक्तस्यानुमंत्रणस्य याज्ञमानत्वादस्य चो
पस्थानत्वान्न विकल्पः। तेन समुच्चय एव। अनुपस्थिताग्नेः प्रवासः। इहैव संनिधौ तदेव। नान्यत्कि
चित्॥ ५४॥ अमावास्यायामपराह्णे० ज्ञेः॥ अमावास्याशब्दः प्रतिपत्संधिदर्शयोः संधिवचनोप्यत्रा
पराह्णशब्दसमन्वयात् तद्दिवसे होरात्रे वर्त्तते तत्रापराह्णे अह्नश्चतुर्थे भागे पिंडपितृयज्ञः कर्त्तव्यः।
औपवसथ्येहनि यजनीये वाहनि। यजनीये चेत्स्वार्थ एव दक्षिणाग्निः प्रणीयते। यदा पुनरहो
रात्रसंधौ तिथिसंधिः स्यात्तदौपवसथ्य एवाहनि क्रियते। दक्षिणाग्नेरेको० स्मादिति॥ एकोल्मु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू०५०२० ॥१२॥

कं एकतः प्रदीप्तमुल्मुकं प्राग्दक्षिणा प्राग्दक्षिणस्यां दिशीत्यर्थः। दक्षिणाग्नेः सकाशादेकोल्मुकं गृ-
हीत्वा तस्मादेव प्राग्दक्षिणस्यां दिशि प्रणयेत्। ये रूपाणीत्यनेन मंत्रेण॥ सर्वक० नृ०॥ अत्र विनिर्दि-
दिष्टानि सर्वाणि कर्माणि तान्येव प्राग्दक्षिणां दिशं अभिमुखानि कर्तव्यानि॥ उपसमाधायोशो
परिस्तीर्य० कर्मेदुल्मुकः। उभयोरप्युपसमाधानपरिस्तरणं च कर्तव्यम् मध्यगतस्यापावितिरा
रस्य विशेषसंबंधेकोरणाभावात्। पात्राणीति चरुस्थाल्यादीन्युच्यंते। तेन शब्देन संव्यवहारार्थं च
रुश्रपणार्था स्थाली चरुस्थाली। चरुस्थाली ध्रुवा स्रुवो ऽंदस ऋस्वत्वं। एकेन प्रयत्नेन छिन्नाः
कुशाः सकृदाछिन्नाः॥ दक्षिणतोऽग्निष्ठमा० मज्जेत्॥ निमज्ज्यादिति प्राप्ते निमज्जेदिति छांदसः।
अग्निसमीपे तिष्ठतीत्यग्निष्ठं अवकृतं प्रयाणकाले वाग्नयो यत्र तिष्ठंतीति तदग्निष्ठं दक्षिणात
अग्नेरुत्यत चैवस्य रूपे स्थालीं निधाय त्रीहिभिरापूरयेत्। तां पूर्णां निमज्ज्यात्। यथोपरि तनादिख
देवाच्छूर्पो परिपतंति॥ परिसंना० ध्यात्॥ स्थाल्यास्य देशो छूर्पोपरि पतंति तान्परिसंनामूष
कं देनिदध्यात्॥ कृष्णाजिनं उलू० विवेचं॥ कृत्वा निधायेत्यर्थः। इतरान् स्थाल्यंतर्गतानीत्यर्थः॥
अत्र विवेचं। अत्र विविच्य विविच्येत्यर्थः॥ अवहताव० येत्॥ अत्र इतेषु अवहतवचनं फलीकरणनि
वृत्त्यर्थं। दक्षिणाग्नौ श्रपयेदिति श्रपणवचनेन वचनाद्दृत्ते गार्हपत्य एव श्रपणमिति ज्ञापनार्थं॥
अर्वागिति प्रणी० षदइति॥ दक्षिणाग्न्यतिप्रणीतयोरंतराले उल्लिखेदित्यर्थः॥ तामभ्युक्ष्य सं०
ध्रुवायामाज्यं कृत्वा॥ आज्यं सर्पिरित्यादि ध्रुवायामाज्यं कृत्वा दक्षिणात इत्येवमतः पदसमूहः॥
आसादयेद् दर्भिषो ये स्यस्मात्पुरस्तादर्थतो द्रष्टव्यः। तेनायमर्थः। तां लेखामभ्युक्ष्य सकृदाच्छिन्नै ॥१२॥
रवस्तीर्य आज्यं सर्पिर्गृहीत्वा ध्रुवायां कृत्वा दक्षिणतो दक्षिणाग्नेर्निधाय तेनाज्येन स्थालीपाक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मभिघार्य दक्षिणाग्नेः पश्चादासादयेत्। यदि नवनीतमाज्यं कार्यं स्यात्तदास्य विलीयमानं कृ न
त्वाऽन्यस्मिन्पात्रे आनीय पवित्राभ्यां तूष्णीमुत्पूय तेनो स्रुवायां कृत्वा दक्षिणतो दक्षिणाग्नेर्निधाय
तेनाभिघार्येत्यादि समानं द्वितीयाज्यग्रहणेऽस्ये दर्शयाजनं। पात्रांतरस्थमुत्पूय पश्चात्स्रुवायां
ग्रहणमित्येवमर्थं। पूर्वमाज्यग्रहणं कार्यलक्षणार्थं। सर्पिः पक्वं। नवनीतमपक्वं॥ दक्षिणत आंज०
णानि॥ दक्षिणतरस्यत्रापि संबध्यते। विशेषाग्रहणादपेक्षितत्वाच्च। आंजनादीनि च दक्षिणतो
दक्षिणाग्नेर्निदध्यात्। पूर्वसूत्रेऽपपाक्रमेण सूत्रप्रणयनं। दक्षिणतरस्यास्यापत्यार्थत्वादेव॥ प्रा
चीनावीती भू०धानमद इति॥ रुभः पंचदशसंख्याकः। मेक्षणेनादायतेनैव जुहुयात्। अवदानसंप
दाऽवदानसंपन्नामुपस्तरणादिरवदानं प्रसभिघारणं च। नयेत्थं भूतं जुहुयात्। नात्र स्वाहाका
रः स्वधानमःन्यादस्य प्रदानार्थत्वात्॥ स्वाहाकारेणवाग्नि०वीती॥ स्वधानमःन्याद्स्य स्थाने स्वा
हाकारं वा कृत्वा जुहुयात्। अस्मिन्पक्षे मंत्रविपर्ययोऽप्युपासः। यज्ञोपवीतत्वं च भवति। अग्निपूर्व
मिति। अग्नये कव्यवाहनायेत्येतं मंत्रं पूर्वं कुर्यादित्यर्थः॥ मेक्षणमनुप्रहरत्यप्राची०महाद इति॥ प्राची
नावीती ग्रहणं स्वाहाकारपक्षेऽपि मेक्षणानुप्रहरणोत्तरकालं प्राचीनावीतित्वप्रापणार्थं। उभय
स्मिन्पक्षेऽपि मेक्षणमग्नावनुप्रहर्तव्यमेव। त्रिभिर्मंत्रैस्त्रीन्निनयेत्। पिंडस्थानेषु॥ तस्यां पिंडा
निपृ०त्रान्विति॥ अधिवृतायां लेखायां लेखासंप्रत्ययार्थं तस्या ग्रहणं क्रियते। नाधिकारालेखा
संबंधोऽस्तीतिज्ञापनार्थं। तेन हविरासादनमग्नेः पश्चादिति साधितं भवति। तथेवोक्तं च। निपृणी
यादध्यादित्यर्थः। निपरणं पित्र्येणैव तीर्थेन पाणेरुत्तानत्वमजहद्देवपित्र्येण तीर्थेन यदा कुर्यात्तदा
पराचीनपाणिर्भवति। असावित्यस्य स्थाने संबुध्यंतानि पित्रादीनां नामानि गृह्णीयात्। ततस्मैतस्मै
य एषां प्रेता०र्थत्वात्॥ त्रयाणां मध्ये प्रेतानां पिंडदानं। जीवानां प्रत्यक्षाऽर्चनमिति गाणगारेर्मतं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्॰१९०टी॰
॥१३॥

पितृप्रीत्यर्थत्वात्कर्मण इति॥ सर्वेभ्य एव नि॰णत्वात्॥ पित्रादिभ्यस्त्रिभ्यः प्रेतेभ्यो जीवद्भ्यश्च सर्वेभ्यो
निपरणं तेर्वलिर्मन्यते। क्रियाया मुद्देश्यकारकत्वेन च गुणभूता। पितरः न तेषां प्रीतिः शास्त्रतो
लोकतो वा गम्यत इति॥ अपि जीवांत॰रिता॥ आदिमध्यातन्नादेः पितृपितामहप्रपितामहा उच्य
ते। जीवः अंतो यस्य स जीवांतः। अपि शब्देन जीवादिर्जीवमध्य इत्यस्यापि लभ्यते। जीवसर्व इति च
त्रयाणामेकस्मिन् द्वयोः सर्वेषु वा जीवत्सु वा यावदर्थं परान्पितृन् गृहीत्वा प्रेतेभ्यस्त्रिभ्यो दद्यादिति
गौतमो मन्यते। क्रियाहृर्थकारिता। मरणपदार्थप्रवृत्ताय स्मात्क्रियते स अर्थः॥ उपायविशेषो॰
नं॥ पित्रादीनां जीवानां मृतानां च पिंडदाने उपायविशेषो वक्ष्यत इत्यर्थः॥ उपन्यस्तान्पक्षान्दूषयि
तुमाह॥ न परेभ्यो॰णीयात्॥ गौतमगाणगारितोल्वलीनां क्रमेण दूषणानि॥ नजीवांतर्हि॰भ्यः॥
जीवत्स्वहितेभ्यो न निपृणीयादित्यर्थः॥ सर्वपक्षव्यापि दूषणं। सर्वत्रानधिकारादिरयमेव हेतुः॥
अनधिकारात्॥ अयोग्यत्वादित्यर्थः। क्वचिद्विध्यभावात् क्वचिन्निषेधात् अयोग्यत्वं अवगम्यते।
अयमुपायविशेष उच्यते। जुहुयाज्जी॰भ्यः॥ जीवेभ्यो जुहुयात्। प्रेतेभ्यो निपृणीयादित्यर्थः॥ नजी
वंतमतीयाद्दध्यादिसत्रात्विनिषेधोऽस्ति। तेन जीवपितुः जीवपितामहस्य जीवोभयस्य वा॰यम
त्विपक्षो नास्ति। तत्र होमांतेऽनारंभो वा॥ अथ सर्वेषु जीवत्सु कथमित्याह॥ सर्वहुतं॰विनः॥ स
र्वहुतमिति सर्वपिंडाहोतव्या इत्यर्थः॥ पिंडहोमो निपरणमंत्रेण। स्वाहाकारांतेन कर्तव्यः॥ अत्र
दूषणीयपक्षाणां उपन्यासे प्रयोजनं। सपिंडीकरणे पितामहे जीवति पितरि मृते संवत्सरादिषु
कालेषु तस्यावश्यकर्तव्यत्वात्। तत्रैषां पक्षाणामुपयोगः इत्येवमर्थः। एवमाद्यादीनि अन्यान्यपि ॥१३॥
प्रयोजनानि चिंत्यानि॥ नामान्य॰हेति॥ पित्रादीनां नामाज्ञाने ततादयः शब्दाः नामस्थाने प्रयो
क्तव्याः॥ निर्वृतानतुमं॰पश्चमिति॥ निर्वृत्तानिति प्राप्ते निर्वृतानिति छांदसो निर्देशः॥ निर्वृत्ताने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वपिंडानन्वनुमंत्रयते। नहुतानित्येवमर्थनिष्टत्ता नित्युच्यते। तेन सर्वहोमरदमनुमंत्रणं नभव
ति। अत्र स्मिन्प्रकरणे यद्यपि पिंडानामेवानुमंत्रणमुपस्थानं प्रवाहणं च विधीयते। तथापि मंत्रा
र्णापि न लिंगता त्पिंडाए एव पितर इति रूत्वा पितर एवैते मंत्रे रभिधातव्याः॥ सव्यावृदुदं ऊर्ध्वस०
नेति। अनुमंत्रयेतेति शेषः। सव्यावृदुदं ऊंति एतावतैव सव्यावृत्तो दड्मुखत्वयोः सिद्धयोरावृ
त्येति वचनं। आवृत्यैव दोघ्वासोन पूर्वमिति। एतदर्थं यथाग्न्युत्सपनुध्वसन्नासितापुनरभिपर्या
वृत्येति वचनं। आवृत्यैवो घ्वासोन पूर्वमिति। एतदर्थं पाठ्यः। व्यक्तिस्तु प्रमादतः॥ चरोः
रसेअमीमदंतेन सनुमंत्रयते। आरषायीषतेति प्रकारः पठितव्यः। व्यक्तिस्तु प्रमादतः॥ चरोः
प्राण० पेत्। तत्स्मीमेवात्र प्राणभक्षणं कार्यं॥ निरस्य निन० नं॥ पदुदको पनमुक्तस्तु धंतांपितर
रसादिमंत्रकं तदत्र निनयनमित्युच्यते। तदत्र कर्तव्यमित्यर्थः॥ अत्र सावभ्यं० नांजने॥ दद्या
दितिशेषः॥ वासो दद्या० युग० धमिति॥ एतेषामन्यतमं द्रव्यं वासोर्थे पिंडेषु दद्यादित्यर्थः। द
गावस्त्रस्यांतप्रदेशाः। दूर्णास्तु कांवाः। अवि लोमानि। पंचाशद्वर्षता याः पंचाशद्वर्षवती तेषु र्ध्वे
जो वस्त्रस्य ईयमेव लोमवासार्थे दद्यात्। मंत्रस्त्वप्येवं सर्वेषु द्रव्येषु समान एव भवति॥ अत्र पुनो
नुपति० तः स्याम॥ इति कारव्याहारेण सूत्रच्छेदः। सं न स्यामेति मंत्रः पठितव्यो वकारं वर्जयित्वा॥
मनो न्वा० भिः॥ उपतिष्ठेतेति शेषः। अत्र येनापवाह० च्छनेति॥ अत्रापि पिंडस्थानपितृन्प्रवाह
येत्॥ अग्निं प्रत्येयाद० मैरिति॥ प्रत्येयादितिवचनसामर्थ्याद्दक्षिणामुखेनात्र किंचिदनुव्रज
नं कर्तव्यं। अग्निं प्रत्येयादग्ने न मध्येति अविशेषवचनं दक्षिणाग्निमेव। इतरयोर्निषेधाभिधा
नात्॥ गार्हपत्यं प्रदंतरि० न समिति॥ प्रत्येयादिति शेषः। वीरं मे दत्तपितर इ० ध्यमं॥ आदद्यादिति
शेषः। पत्नी प्रा० सदिति॥ तमेवमध्यममिति शेषः। पत्न्येवमंत्रं ब्रूयादाधत्तेति॥ अत्र एवि० रो॥ प्रसि

न

79

सू० पू० वृ० ॥१५॥

वेदिस्त्वर्थः॥ अग्निप्रणी० वा॥ प्रक्षिप्य दाहयेत्॥ यस्य वा गं० श्नीयात्॥ आगंतुरभिनवः निर्निमि
त्त एवान्नेष्वभावो यस्य स वे नरो श्नीयात्। महारोगे० गच्छति॥ स्वयकुष्ठादिना ऽन्यस्य परि
हारेणाति पीडितः श्नीयादिति पुनर्वचनं पूर्वेणास्य संबंधनिरासार्थं। तेनान्यतरामिसत्रैव भव
ति। अन्यन रोगतिं गच्छतीत्ययमर्थः। स च एव आरोगो भवेत् म्रियेत वेति। एवमनाहि० नित्ये॥
अनाहिताग्निरप्येवं पिंडपितृयज्ञं कुर्यात्। नित्यऔपासने इत्यर्थः॥ अप इत्वा० यात्॥ तस्यार्थं
विशेषः। हविःश्रपणं कृत्वाऽग्निप्रणयनं कर्तव्यं। तस्यैवाऽग्निप्रणीतस्योपसमाधानं परिस्तरणं च
कृत्वा ततो वाग्निप्रणीतादित्यादि समानं। जुहुयादित्ययमनुवादः। अयं चात्र विशेषः। यदंतरिक्ष
मित्यस्मिन्मंत्रे गार्हपत्यत्रा रद उक्तं त्रयः। तच्च प्रवृत्तिनिमित्तस्य संस्कारस्यात्राभावादिति। द्वि
वस्या०त्सर्गः॥ द्विरा इत्यर्थः॥ तृणं द्वि० इक्ते॥ एकस्यातिरिक्तस्य तृणे च द्वित्वं संपाद्य उत्सर्गः। कर्त्त
थ इत्यर्थः॥ ५॥ दर्शपूर्णमा० णीयां॥ पूर्वं दर्शपूर्णमासयोः स्वरूपमात्रमुक्तं इदानीं तयोरनुष्ठा
नारंभ उच्यते। इदानीं तावारभ्यमाणस्यान्वारंभणीयाविधानात्। यस्मादाधानानंतरं अज
स्त्वाग्निहोत्रपिंडपितृयज्ञानुक्त्वाऽनयोरारंभ उच्यते। तस्मादेतत्साधितं भवति। पौर्णमास्या
माधानमिष्टिं च कृत्वा ततोऽन्वाधारणमग्निहोत्रहोमं च कृत्वाऽमावास्यायां पिंडपितृयज्ञं च कृ
त्वा पौर्णमास्यां तयोरारंभ इति। तत्र यदापस्तंबवचनं। पौर्णमास्यां तु पूर्वस्मिन्पर्वणि सेष्टिं सान्ना
रंभणीयमपवृज्य स्थालीपाकेन पौर्णमासेन यजेत इति। अस्यायमर्थः। पौर्णमास्यामादधानस्तु दहरे
वपौर्णमासीमारभेतेति। तस्यायं विषयः। यस्यां पौर्णमास्यामन्वारंभणीयापर्यंतं सर्वं प्रतिपत्से ॥१४॥
च दर्शसंधिक्षणात्प्रागेव कर्तुं शक्यते सास्य विषयः। संध्यनयगमात्पौर्णमास्यधिकारप्राप्तिरि
ति। एकस्मिन्नहनि यदुत्तस्मिन्क्षणे दर्शपूर्णमासावारभेते स तस्मात्पूर्वस्मिन्क्षणे तावारस्यमान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युच्यते। तस्यान्वारंभणीया कर्त्तव्या। सेयं पुरुषार्था। न कर्मार्था श्रुत्यादीनामभावात्। दर्शपू
र्णमासावारप्स्यमान इत्यनेन न च कर्मसंबंधो वक्तुं न शक्यते। निमित्तत्वेनाधिकारिविशेषणत्वे
नउपेक्षयात्। उद्देशकेन भवितुमर्हति। तस्मादनंगत्वयोरन्वारंभणीया। तथापि तत्संबंधिपु
रुषसंबंधात्। तयोरेवाधिकारित्वेन पुरुषं संपादयतीति। युक्तमुक्तं। अथातो दर्शपूर्णमासा
वित्तौ निरुक्तिषु वचनपुनः पुनः कार्याणि दर्शनाभावात्। कार्यसंबंध्यतिदिश्यते। न पुरुषार्थसंबंधम
पीति॥ अग्ना विष्णू सर० गी॥ भगीत्यग्नेर्गुणाः अग्ना विष्णू सजो० स्याभरेति॥ इष्टेर्याज्यानुवा
क्याः॥ आधानाद्यथा० चेपरहितः॥ अग्नमयावीउ दूरव्याधिमान् अर्थव्यथा अर्थहानिः अर्थाः पु
त्रःपश्वादयः आधानानंतरं तस्मिन्नेव संवत्सरे प्रघेतानि निमित्तानि स्युस्तदा पुनराधेयं कर्त्तव्य
मिति। अन्यमर्थो, स्मिंलूत्रे, धाष्यते। तस्मिन्पुनराधेये वक्ष्यमाणलक्षणा इष्टिः कार्येत्यर्थः॥
तस्यां प्रयाजा०जेत्॥ तस्यामिति वचनं तस्यामेवेष्टौ। नान्यस्यां वक्ष्यमाणो विधिः स्यादित्येवमर्थ।
तेन नाश्यते नैके ष्टिकं पुनराधेयमिति। विभक्तिभिः सहितान्प्रयाजानुयाजान्कुर्यात्। का विभक्तिः
कवा प्रदेशे प्रयोक्तव्याः किं सर्वेषु उत कतिपयेष्विति। एतेषां संशयानां निवृत्तये। चतुरः प्रयाजा
न्पठित्वा तानेव प्रयाजांश्चतुरो विभक्तिभिः सहितान्पठति। द्वावनुयाजौ च पठति। अनयोरविरु
तत्वमित्यर्थ॥ समिधः समिधोग्ने अग्न आज्यस्य व्यंतु० तनू० इडो० बर्हि० वेत्विति। नराशंसि नान
राशंसो ग्निमग्न इति भवति। विभक्तिविधानस्याविशेषात्। पाठस्य चोत्तमप्रयाजानूयाजव्या
वस्थर्थत्वात्॥ समिधाग्निं दुं० भागौ॥ सोमस्थाने यग्निरेवा। तयोरेते अनुवाक्ये। बुद्धिमे दिदु०
त्सते॥ आज्यभागयोरेतौ गुणौ। तथानुवृत्तिः। निर्गुमेषु सगुणयोरेवानुवृत्तिरित्यर्थः॥ इज्याच०॥
इज्यात्रा देनयाज्या या देवता देशउच्यते। सवसगुणयोरेव कर्त्तव्यः। केचिदहानुवृत्तिरादेनेवदेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू०ग्र०२० ॥१५॥

तान्नाद्रस्यापि ग्रहणमभ्युपगम्य इज्यांचेत्तनेन याज्यामुच्यमानास्याग्निनाद्रस्य सगुणोच्चारणमि
ष्यति॥ नित्यं पूर्वमनुब्राह्मणिनोऽग्नं०तरं॥ नित्यः केवलोऽग्निः। अनुवाक्या च। अग्निरेवाणीत्य
नुब्राह्मणिन आचार्याः। उत्तरोऽपि केवलोऽग्निरियं चानुवाक्या। अनुब्राह्मणिनामेवाभिप्रायेण॥
नित्यस्तूत्तर० द०। उत्तरे याज्यामंत्रे हविःत्रा दस्य सोमधर्मत्वान्न निवृत्तौ। तस्य निवृत्तिप्रसंगे तत्स्था
नापन्नत्वादग्नेरपि तद्धर्मसंबंध इति मत्वा नित्य इत्युक्तवान्॥ आग्नेयं हविरधात्यग्ने० स्य वेत्विति॥
गतार्थमिदं॥ ६॥ आग्रयणं व्रीहि०वानां॥ अग्रे अयनं भक्षणं येन कर्मणा तदाग्रयणं। प्रथमद्वि
तीययोरीकस्य दीर्घत्वं व्यत्ययः। एषां त्रयाणां द्रव्याणां संवत्सरे प्रथमनिष्पन्नानां आग्रयणं नामक
र्म कर्त्तव्यमित्यर्थः। व्रीहिग्रहणं द्रव्यप्रथमनिपातो व्रीहीणां प्राधान्यस्थापनार्थं। तेन कालचोदनाव्री
ह्याग्रयणस्यैव भवति। श्यामाकद्रव्यस्य मध्यनिपातो व्रीहिकालायवकालयो भिन्न इति ज्ञापयति॥
सस्यन्नाश्नीया०मद्धुत्वा॥ सस्यं नवनिष्पन्नं तन्नाश्नीयात्। आग्रयणेनानिष्ट्वा। यद्याग्रयणेनानि
ष्ट्वतो नवनिष्पन्नेनान्नेन विना निर्वाहो न स्यात्तदा तेषां द्रव्याणां तत्कालनिष्पन्नेन सायंप्रात
रग्निहोत्रं हुत्वाऽश्नीयात्। ततः कालेऽगते आग्रयणं कुर्यात्। अग्निहोत्रमहुत्वा नाश्नीयादितिव
चनादाग्रयणेनानिष्ट्वाऽप्यग्निहोत्रं हुत्वाऽश्नतो न दोष इति गम्यते। सस्यग्रहणं व्रीह्याद्यन्यदपि
यन्निष्पन्नं तस्य सर्वस्य प्रतिषेधार्थं॥ यदा वर्षस्य तृप्तस्या०जेत॥ यदा वर्षतृप्तिर्लोकस्य भवति त
दाग्रयणेन यजेत। अनेन प्रकारेण व्रीह्याग्रयणस्य शरत्काल उक्तो भवति। शरतमेव कालं श्रुत्या
समर्थयति। अपि हि देवा आहु०जत इति॥ अग्निहोत्री वे०यात्। अग्रयणेन यजेतेति इहि ॥१५॥
हे वाग्रयणश्रादेनोक्ता। इदानीमिदमप्युच्यते। अग्निहोत्रहोमार्था धेनुरग्निहोत्रीत्युच्यते। तां व्री
हिश्यामाकयवानामन्यतमं चारयित्वा तस्याः पयसा सायंप्रातरग्निहोत्रं जुहुयात्। इष्टिःप्रथ

82

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मः कल्पः। तदसंभवे। यमनुकल्पः। इति द्वावेवाग्रयणकल्पौ अत्रोच्येते॥ अपि वा क्रियायवे० षु॥
यवैराग्रयणस्य क्रिया भवेत्। अक्रिया यवेति विकल्पः॥ इष्टि० राज्ञः॥ त्रयाणां वर्णानामविशेषेण
कल्प इत्यप्राप्ते राज्ञो विशेष उच्यते। इष्टिरेव नान्य इति॥ सर्वे० के॥ सर्वेषामपि वर्णानामिष्टिरेवैके
के मन्यंते। श्यामाकेष्ट्यां० रुः॥ श्यामाकाग्रयणेष्ट्यां सोमदेवत्यश्चरुर्भवति। कालो वर्षा ऋतुः। ग्रं
थांतरे दर्शनात्॥ सोमयास्ते० न्नाथ॥ इति काराध्याहारेण सूत्रच्छेदः। नित्यत्वप्राप्तेरनेनैव भागभि
ति मंत्र उच्यते। तस्य नित्यत्वे सत्यपि नित्यवचनं। एतेन भक्षिणा इति विध्यति देशोऽत ऊर्जितस्य प्राप
णार्थं॥ भद्रान्नः० भद्रेति॥ स्मृतिप्राप्तस्याचमनस्य विधानं यस्मिन्देशे आचमनं कृतं तस्मिन्नेव
देशे स्थितस्य नाप्यालंभनसिद्ध्यर्थं॥ एतेन भक्षि० भोजने॥ एतेन विधानेन सर्वभक्षेषु सर्वभक्षि
णः सर्वान्भक्षान्भक्षयेयुः सर्वत्रवचनं प्रकरणादुत्कर्षार्थं। नवभोजनवचनं लौकिकेऽपि नवभोजने
प्रापणार्थं। सर्वत्रवचनात्प्रकरणादुत्कर्षमपि नवभोजनवचनाल्लौकिक एव व्यवतिष्ठते। वैदिकेऽग्नि
होत्रहोमे नवानां सवनीयानित्यत्र न प्राप्नुयात्। तत्रापि प्रापणार्थं भक्षणवचनं॥ अथ व्रीहि० विराजौ॥
अथानंतरं व्रीहीणां यवानां चाग्रयणेष्टिरुच्यते। नवव्रीह्याग्रयणस्य काल उक्तः। वसंते यवाग्रयण
स्य तत्र हि तेषां प्रथमः पाक इति तत्र विशेषाभावात्। उभयोः सहवचनं तयोः पाक्ये विराजौ च भवतः।
उत्तरस्यौर्णमासं तत्र वैराजमित्येतावतैवोक्ते पितान्मात्रविकार सिद्धौ सत्यां धाय्या विराज गृहण
विकल्पेन दृध्वंतोरपि प्रापणार्थं॥ अग्नेंद्रा निंद्राग्नी वा० वा॥ अथ द्वयोर्विकल्पेनैता देवता गृह्यंते। य
दि श्यामाकाग्रयणमस्यामेवेष्टौ समानतंत्रेण क्रियते तदा सोमस्तृतीयो भवति॥ अग्नाये० मिति॥
इंद्राग्न्योः सोमस्य चोक्ता याज्यानुवाक्याः॥ ७॥ अथ काम्या० तुमंतो॥ अथ पूर्वस्यानंतरं काम्या इष्टय उ
च्यंते। प्राक् चातुर्मास्येभ्य इत्यर्थः। काम्या इति वचनमनिर्दिष्टकामा अपि नित्याः ग्रंथांतरादपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू०वृ०पृ०

॥१६॥

नासांकामो ऽन्वेष्टव्य इत्येवमर्थं ॥ आयुष्का० ते ॥ आयुष्कामस्य इष्टिः ॥ आयुष्कामेष्टिः ॥ अस्मिन्प्रकरणे का
मग्रहणानामेतत्प्रयोजनं यद्देवतासंयुक्तायामिष्टौ यत्तत्र विहितं तद्देवतासंयुक्तायामप्यन्यका
मसंयुक्तायां तन्न भवतीति ज्ञापनार्थः ॥ आनो अग्ने० गामित्यग्नि० स्त्राता ॥ द्विदेवते आयुष्मानित्यग्ने
गुणः ॥ आतेति इन्द्रस्य गुणः ॥ आयुष्टे वि० इत्थितरं तो ॥ स्वस्ति गमनसाधनी ष्टता स्वस्त्ययनी ष्टिः ॥
अग्नेरक्षा० न इति ॥ रक्षालिंगात् गोतमस्यैव ॥ अग्निः स्व० याज्ये ॥ पाहि न इत्येते ॥ पुत्रका० त्री ॥ पुत्रका
मस्येष्टौ अग्निः पुत्री देवता पुत्रीत्यग्नेर्गुणः ॥ यस्मै त्वं० त्तरे ॥ ये उत्तरे इष्टी वक्ष्येते मूर्धन्वत्काम्ये ति च
ते अग्नि देवत्ये भवत इत्यर्थः । पूर्वस्यां मेने मूर्धन्वान्गुणः उत्तरस्यां कामो गुणः ॥ निरेष मूर्ध० तः ॥
अग्निर्मूर्धा भुवो यज्ञस्येत्यर्थः ॥ तुभ्यं ता० माय ॥ कामगुणकस्याग्नेस्तुभ्यंता अंगिरस्तमो न्या मत
काममिति याज्यानुवाक्ये ॥ वैम०रे ॥ उत्तरे द्वे इष्टी वैमृध्यौ भवतः तयोर्वक्ष्यमाणे याज्यानुवाक्या युग
ले तेरिंद्र देवते भवतः सचेंद्रो विमृधुणकः ॥ वैमृध्यो यगुणको वा भवति अत एते इष्टी वैमृध्या इत्यु
च्येते ॥ विन इंद्र० स्तुतिं नयेति ॥ एते पुष्टिकामस्य याज्यानुवाक्ये ॥ इंद्राय दा० त्रे वा ॥ इंद्रो दाता सपुन
र्दाता वा देवता भवति उभयथाप्येते याज्यानुवाक्ये वचनसामर्थ्यात् ॥ यानि नो ध० ले स्यो वा ॥
आग्ना आग्नापालावा देवता अत्रापि याज्यानुवाक्ययोरैक्यं ॥ आग्नानामाता० लोके ष्टिः ॥ इष्टिनामेदं ॥
पृथिव्यंतरि० वताः ॥ देवताग्रहणं पृथिव्यादीनां पृथग्देवतात्वसिध्यर्थं । त्रिलिंगत्वा याज्यानुवाक्य
योस्तिस्त्रः सहिता एका देवता मा भूदिति । तेनैतत्साधितं भवति । याज्यानुवाक्यालिंगा देवता निर्ण
यः कार्य इति ॥ पृथिवी मात० स्त्रयाणां ॥ एतास्तिस्त्र ऋचस्त्रयाणां हविषां याज्यानुवाक्या भवंति उत्त
रत्रेव विनिवेशसामर्थ्याद्देवतास्यार्थस्य सिद्धो सत्यावचनमिदमन्यत्रापि तिस्त्रस्त्रयाणां विहिता एव
विनिवेशयितव्या इत्येवमर्थं । एवं भवतीत्याह ॥ प्रथमे प्र० मस्य ॥ ८ ॥ मित्रविंदाम० जी ॥ मित्राणि यथा

॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विंदते सामित्रविंदा। गुणनामैतत्। महावैराजीति नामैव॥ अग्निः सोमो० प्रदाना॥ दशैता देवता ए
कप्रदाना महावैराज्या भवंति। एकप्रदानत्वादुक्तार्थः॥ अग्निः सो० क्रतुयन्न॥ इयं अनुवाक्या॥ प्र
तिलोमं० सोमो अग्निरिति॥ एता देवताः प्रतिलोममादित्य यजेत। ये यज्ञामहे इति वचनं याज्या
मेव प्रतिलोमत्वं नान्येषु निगमेष्वित्येवमर्थः। प्रतिलोमविधानादेव प्रतिलोमत्वे सिद्धे प्रतिलोम
पाठस्येदं प्रयोजनं। उत्पत्तियागक्रमयोर्विरोधे पूर्वपूर्वस्यातिक्रमः। उत्तरेषु यागक्रम इत्यस्य न्यायस्यै
न्द्रामारुत्या भुक्तत्वादुत्तरेषु निगमेषु प्रतिलोमत्वं स्यादिति तन्निवृत्त्यर्थम् इदं च पाठप्रयोजनं। वरु
पास्या पुर्पास्तुत्वे भवतीति॥ त्वष्टारूपाणीति याज्या॥ अग्नेवै० तत्राः॥ आग्नेय्या उत्तरे इत्येवमाद्या
महावैराज्यं ता इत्यो वैराजं तत्राः॥ तासामाद्याः० षः॥ अनुवादोयं प्राप्तत्वात्। प्राप्तानुवादे प्रयोजनं
हविःत्वादेन प्रधानहविषामेव ग्रहणमिति ज्ञापनार्थं॥ स्नुषाश्वश्रुरी० त॥ स्नुषाश्वश्रुरीयं नामे
ष्टिः। तयाऽभिचरन् त्वा तु मारयामीति संकल्प्य यन्यजेत॥ इन्द्रः स्त्रो उपासतां॥ याज्यानुवाक्ययोर्लिं
गादेवाः स्याद्देवताकल्प्या॥ सान्वेइः। इन्द्रः सूरगुणो वा॥ जुष्टो दमूना० चेसंज्ञानि॥ विमतानां विमन
स्कानां संमतिप्रयोजनार्थं संज्ञानी नामेष्टिः कार्या॥ अग्निर्वसुमा० प्रदाना॥ चतस्रः सगुणा देव
ताः एकप्रदाना वेदितव्याः॥ अग्निः प्रथमो वसुभि० वेदा इति॥ एषा संज्ञानी नामेष्टिः। स्वामिभृत्ययोः
संमत्यर्थं। यः समाने मिथो विप्रियः स्यात्तमेतया याजयेदिति श्रुतेः॥ ऐन्द्रामारुती० मा॥ इन्द्रश्च मर
तश्च देवते यस्याः सा ऐन्द्रामारुती सैवा। अविग्रहः। केवलानां मरुतां याज्यानुवाक्यादर्शनादिन्द्रस्युत्वे
पूर्वयोक्तयोर्ग्रहणेन द्विदेवत्येयमिति निश्चीयते। भेदकामाः राज्ञां च विशां च लोके आहिताग्नयो
यदि स्युः। तेषामस्यामधिकारः। एकैकस्यैव॥ मरुतो यस्य हि क्षये० बइति॥ इन्द्रस्य नित्यैरवा॥ ऐन्द्रीम
नूच्य० तो वेइंवा॥ प्रधानक्रम एवांगानां क्रम इति प्रसिद्धो न्यायः। अत्र तु प्रधानयोः परस्परव्यतिषक्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृ॰सू॰वृ॰ सिद्ध्योः क्रमो नास्ति। याज्यानुवाक्याभ्यामुभाभ्यां यागक्रियाऽवयवभूतस्याउद्देशभागस्य सि

॥१८॥ द्धेरिति मन्यमानो विकल्पमुक्तवान्। व्युदस्यत्येनं॥ प्रधानादूर्ध्वं॰ इत्तः॥ सत्येमुत्पत्तिक्रमाभावे प्रधा

नक्रम एवांगानां भवति। उत्पत्तिक्रमे तु सति स एवानुष्ठातं विरोधित्वात्प्रधानात्प्रागभवति। पश्चा

त्तु प्रधानक्रम एवेति न्यायः। अत्र तु प्रधानयोः क्रमोऽस्त्येव। याज्यायाएव देवतायाः प्रतिपादकत्वात्।

आवाहनादिवदनुवाक्याया देवताद्वयस्वरूपप्रतिपादकत्वाभावात् एवात्रेयागः पूर्वं क्रियते। पश्चा

दिंद्र इति विनिवेशमुक्तवानाचार्यः। वानस्तोत्रे पक्षव्यावृत्त्यर्थः॥ प्रवृत्तास॰ सांग्रानीच। यथाहिता

ग्नयो राजविद्वांसपत्तिकामयेरन्। तदा ते एते देवते प्रत्येवयजेरन्। पूर्ववदेकैक एवते। ततः सं

ग्रानीच कुर्युरेवमेव॥ ऐंद्रावार्ह॰माणाः॥ ऋत्विग्भिरभिप्रयमानाः। आनंद्रबृहस्पती॰ दयेयुः॥

येंद्रावार्हस्पत्यं निरूप्य इंद्राय चोदयेयुः। अन्यथार्थवः। यदा वार्हस्पत्यं निरूप्य इंद्राय चोदयेयुः।

उभयोरपि पक्षयोरेते एव याज्यानुवाक्ये भवत इत्यर्थः॥ ९। पवित्रेष्ट्या॥ एतदुक्तं भवति नहृष्ट॥ १०॥

वर्षकामेष्टिः कारी॥ वर्षकामस्य कारिरी नाम इष्टिः कार्या॥ तस्याप्रतिसं॰ धाय्ये। तस्यामिति का

रीर्यामित्यर्थः। अत्र बहुदेवत्याया आम्नानात्। अन्यदा इयमेव कारीरी एकदेवत्या भवति तस्याम

पि प्राप्णोर्थतस्या गृहणा॥ याः का श्च॰तो॥ एतो वर्षकामेष्टिमात्रे भवतः॥ अग्न्याग्नं॰ दिति॥ अ ॥१८॥

त्र पूर्वस्यागायत्रीत्वात् तत्साहचर्यादुत्तरापि गायत्र्येव गृहीतव्येति। तथा चोत्तरत्र वक्ष्यति। अग्नि

मंतो गायत्राविति। इदमेव वाक्याम्नायमनुसरन्॥ अग्निर्धाम॰ स्तुष्टुः॥ धाम॰ दिष्यानेर्गुणः॥ ति

स्त्रश्च॰रा॥ उत्तरास्तिस्त्रः पिंड्यश्च भवंति। पिंड्य इति पिंडीद्व्यामरुद्वत्योगा इत्यर्थः॥ हिरण्यके स्त्रयोपार

स्त्रो॰ तोयथानरः॥ भामुपदो याज्यानुवाक्यायुगलद्वयं व्यवस्थायोजनीयं। यदा केवलोऽग्निस्तदा

सर्वां यदाग्निर्धामछंदो तरमिति॥ अग्नेर्वा धस्व॰ रेके यजंति॥ पिंडीयागानितिरोषः॥ एकेयादि

86

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नक्षत्रएवा॰नुवाक्यायुक्ता यजुर्भिरेव पिंडी यागं कुर्वंती त्यर्थः। अत्र विशेषस्तेभ्यएवाधिगंतव्यः॥ सं
स्थितायां सर्वादिष्टा॰ सूक्तेन वा॥ एकैकां दिष्टां सर्वादिष्टाः रस्तुपक्रम्य च तस्याभिः प्रस्रच मित्युप संहारादं
न्यत्रापि दिष्टां सर्वत्र तं च तेस्मैव पर्यवस्यतीति गम्यते। सूक्तेन सूक्तेन वा। एकैकां दिष्टां रतेन सूक्ते
नोपतिष्ठेत्येवं वा॥ ११॥ अत ऊर्ध्व॰ नानि॥ अत ऊर्ध्वं यानि वक्ष्यंते स्मिन्न ध्यायेता निरूढ्यनसं
ज्ञानीति विधात। इष्टिभिरयनं गोमनं येषु कर्मसु तानी ष्ट्ययनानि॥ सांवत्सरि॰ णि॥ संवत्सरेण
क्रियंते संवत्सरे स्वक्रियंत इत्युभयथा विग्रहः कर्त्तव्यः। दाक्षायणयज्ञचातुर्मास्यानामनेकसांवत्स
रिकत्वसिध्यर्थं॥ तेषां फा॰ योगः॥ फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी। चित्रया युक्ता पौर्णमासी
चैत्री॥ तेषां सांवत्सरिकाणां आगंतुकानामस्मिन्काले आरंभः कार्यः। दर्शपूर्णमासगुणविकाररूप
त्वादाक्षायणयज्ञादीनामारंभे काल नियमो नास्तीति तेषामिमुच्यते॥ तुरा॰ णं॥ तुरायणं नामेष्ट्यय
नमुच्यते॥ अग्निरिंद्रो॰ महरहः॥ अग्निदेवत्या ऐंद्री वैश्वदेवत्या विश्वेदेव देवत्या चेता स्तिस्र यदृष्टयः त्रिषुस
वनेषु यथासंख्येन एकैकेष्टिः कार्या ऽहन्यहनि। अहरहरिति वचनं पौर्णमास्यमावास्ययोर्बाधनार्थं॥
एकाबाप्टि॰ बिः॥ एताभिरेव देवताभिर्युक्ता एकैवेष्टिस्त्रिहविष्का दहन्यहनि प्रातःसवन एव कर्त्तव्या
वेत्यर्थः॥ दाक्षायण॰ यजेत॥ दाक्षायणयज्ञः कर्त्तव्य इत्ययमर्थो ऽर्थाल्लभ्यते। तस्मिं दाक्षायणे यज्ञे दे
पौर्णमास्यो द्वे अमावास्ये यजेत द्वितीयानि द्रैव्यात्पत्तिपक्षयोर्द्वित्वं गुणो विधीयते। नात्र तिपन्नयो
र्द्वित्वनिमित्तयोर्विधानमत्रेति गम्यते। एतदुक्तं भवति। या पौर्णमासी यामावास्या ते एव स्वस्वका
ले द्विरावर्त्तयितव्येति॥ नित्ये पूर्वेय॰ स्यापां॥ आरब्धयोः पूर्वे ये ते उक्ते एव न विकृते। तत्रामावास्या द्वि
ते ऽत्र संनयतो यासे व नियम्यते। उत्तरयोरैंद्र पौ॰ नीयं॥ उत्तरयोर्विकार उच्यते। पौर्णमास्यां यद्द्वितीं
यं हविस्तदैंद्रं भवति॥ मैत्रावरु॰ ण्यां॥ अमावास्यायां यद्द्वितीयं तन्मैत्रावरुणं भवति॥ आनो मित्रावरु

87

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विंदते सामित्रविंदा। गुणनामेनत्। महावैराजीति नामैव॥ अग्निःसोमौ० दानाः॥ द्वन्द्वौ तादेवताए
कप्रदानाः सहावैराज्या भवंति। एकप्रदानत्वाद् उक्तार्थः॥ अग्निःसो० क्रतुयज्ञ॥ इयं अनुवाक्या॥ प्र
तिलोम० सोमो अग्निरिति॥ एता देवताः प्रतिलोममादिश्य यजेत्। येयजामहइति वचनं याज्या
मेव प्रतिलोमत्वं नान्येषु निगमेष्वित्येवमर्थः। अनिलोमविधानादेव प्रतिलोमत्वे सिद्धे प्रतिलोम
पाठस्येदं प्रयोजनं। उत्पत्तियागक्रमयोर्विरोधे पूर्वेषूत्पत्तिक्रमः उत्तरेषु यागक्रम इत्यस्य न्यायस्यै
न्द्रामारुत्या मुक्तत्वादुत्तरेषु निगमेषु प्रतिलोमत्वं स्यादिति तन्निवृत्त्यर्थम् इदं च पाठप्रयोजनं। वरु
णस्यास्युपांसुत्वं भवतीति॥ त्वष्टारूपाणीति याज्या॥ अत्रैवै० तत्राः॥ आग्नेय्या उत्तरे इत्येव माध्या
महावैराज्यंता इत्यपो वैराजंतत्राः॥ तासामाघा०षः॥ अनुवादोयं प्राप्तत्वात्। प्राप्तानुवादे प्रयोजनं
हविःन्नादेन प्रधानहविषामेव ग्रहणमिति ज्ञापनार्थः॥ स्नुषाश्वश्रुरी० त॥ स्नुषाश्वश्रुरीयानामइ
ष्टिः। तया। भिषरन्नग्नेत्तुमारयामीति संकल्प यन्यजेत्॥ इन्द्रःसूरो० उपासतां॥ याज्यानुवाक्ययोर्लिं
गादेवाः स्यादेवताकल्प्या॥ सान्वेद्रः॥ इन्द्रःसूरगुणो वा॥ जुहोदमूना० र्थे संज्ञानि॥ विमतानां विमन
स्कानां संमतिप्रयोजनार्थ संज्ञानीनाम इष्टिः कार्या॥ अग्निर्वसुमा० प्रदानाः॥ चतस्रः सगुणादेव
ताः एकप्रदाना वेदितव्याः॥ अग्निः प्रथमो वसुभि० वेदा इति॥ एषा संज्ञानी नामेष्टिः। स्वामिभर्त्र्योः
संमत्यर्थः। यः समाने मिथो विप्रियः स्यात्तमेतया याजयेदिति श्रुतेः॥ ऐंद्रीमारुती० भाः॥ इंद्रश्च मरु
तश्च देवते यस्याः सा ऐन्द्रामारुती सेवाः अत्र विग्रहः। केवलानां मरुतां याज्यानुवाक्या दर्शनादिंद्रस्युत्त
पूर्वयोक्तयोर्ग्रहणेन द्विदेवत्येयमिति निश्चीयते। भेदकामाः राज्ञांच विद्यांच लोके आहिताग्नयो
यदिस्युः। तेषामस्यामधिकारः। एकैकस्यैव॥ मरुतो यस्यहि क्षये० वइति॥ इन्द्रस्य नित्येएव॥ ऐंद्रीम
न्वच्य० तो वेंद्रं वा॥ प्रधानक्रम एवांगानां क्रम इति प्रसिद्धो न्यायः। अत्र तु प्रधानयोः परस्परव्यतिषक्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोरूपं॥उपोक्तवती॥उपपूर्वस्य वचेरिदरूपं॥उपोक्तवती॥निप्रमादपाठः॥पुरस्ताल्लक्षणाच्चः पूर्वभा
गे देवतापदं यस्याः सा पुरस्ताल्लक्षणा॥त्रिष्टुब्बती वीतवती॰ या याज्यापि वान्य॰सः॥अत्र संभवे वि
हितछंदसोऽन्यस्यास्तु याज्यानुवाक्याः कर्त्तव्याः॥न तु याज्या॰सौ॥सर्वथा तावदनुवाक्यायाः॥याज्या
क्रसीयसी न भवति॥नोच्छिकुन॰ती॥याज्येत्यर्थः॥स्तामनरु॰जयेत्॥एकवचनाधिकारे बहुवचनं
याज्यानुवाक्यापरिग्रहणार्थं॥व्यक्तेलु॰येवा॥सर्वलक्षणसंपादनाशक्तो स्वपदार्थपर्यवसितकार्ये
देवतापदे सति तयेवाश्रयणीयं न लक्षणांतरमन्वेषणीयमित्यर्थः॥लक्षण॰मपि वा व्यक्ते॥अत्र पवाए
नं भवति॥अव्यक्ते देवतापदे सति॥लक्षणं गायत्र्याद्याश्रयणीयमित्यर्थः॥अव्यक्त इति चोदितनामधे
यपर्यायेवा वज्रहस्त धूमकेत्वादि पदे चोदितनामधेये वापरार्थे सतीत्यर्थः॥अनधिगच्छत्सर्व॰
न्नाः॥पुष्पयपाप्यभावे सर्वशोऽधिगंतव्याः॥न्नाग्रखान्तरादाहर्त्तव्या इत्यर्थः॥अनधिगम॰आग्नेयी स्यां॥
एवमप्यसंभवे या स्यां कास्यां चिदाग्नेयी स्यां यजेतानुब्रूयाद्वेत्यर्थः॥व्याहृति॰र्वा॥तत्रानुब्रूयाद्यजे
त्यर्थः॥एवं व्याहृतिभिरित्याह॥देवतामादि॰जेच्च॥पुरस्ताल्लक्षणताय अनुवाक्याया देवतां दिती
ययाविभक्त्यादिरूपतो भूर्भुवः स्वरोमिति ब्रूयात्॥याज्यायामागुरमुक्त्वा ततो देवतांततो व्याहृतीः॥पु
नस्तां देवतां उपरिष्टाल्लक्षणत्वाय ततो वषट्कार इति॥नम्राभ्या॰वा॥नम इति नामधेयमृचोर्व
क्ष्यमाणयोः॥इमं मा शृणु॰तिनमः॥एतेन प्रसंगे पुनर्नम इति वचनं एतयोर्नमनस्यार्थं॥नम्र
नमन न्नीलिङ्गत्वं इत्यर्थः॥आग्नेय्याव॰क्ते॥देवतापदरहिते इत्यर्थः॥तथाप्यग्निदेवत्ये एते ऋचौ भ
वत इत्यर्थः॥१२॥चातुर्मास्यानि प्रयो॰र्जन्यां॥चातुर्मास्यानीति रूढ्या यज्ञनामा तानि च वैश्वदेवा
दीनि चत्वारि पर्वाणि॥तानि फाल्गुन्यां चैत्र्यां वा आरप्स्यमानस्तस्याः पूर्वस्मिन्नहनि वैश्वानरपार्जन्य
देवत्याभिष्टिं चातुर्मास्यानामारंभार्थं कुर्यात्॥इत्येते देवते॥याज्यानुवाक्यायुगलदर्शनात्॥वैश्वान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.पू.०३०
॥१९॥

रोग्नेर्गुणः। याज्यानुवाक्ययोरग्निलिंगत्वादित्यर्थः। न केवलं वैश्वानरं कुर्युः। न दाक्षायणानां वैश्वा
नरं नाग्निं यज्ञानां सदनमिति याज्यानुवाक्ये भवतः। वैश्वानरो ऽजी० श्चेति क्यः॥ अग्न्याधेयप्र
भृतिं कृत्वा वैश्वानर पार्जन्यान्ता इष्टयो यास्ता उपांशुहविषः उपांशुप्रधाना इत्यर्थः। सोमोत्पन्नाः।
प्रायश्चित्तप्रकरणोत्पन्नाः॥ अन्वायात्ये० ताः॥ अन्वायात्येककपालानां हविषां संभवाद्यागावि
प्रोष्यंते। अन्वायात्याः एककपालाश्च ये यागाः ते उपांशु प्रयोक्तव्या इत्यर्थः॥ सर्व० र्जं॥ सर्वत्र विषये
वारुणं वर्जयित्वा उपांशुत्वं भवति। न कश्चिदपि विषये वारुणा उपांशुर्भवतीत्यर्थः॥ सावित्र० षु॥ चा
तुर्मास्येषु सावित्र उपांशुर्भवति॥ प्रधानं हं० के॥ हविष्येनावना प्रधानप्रत्यये सिद्धे प्रधानवचनं प्र
धानांतरस्य संप्रत्ययार्थं। अतो ये चतुर्णां पर्वणां व्यपदेशहेतवो वैश्वदेववरुणप्रघासमाहेंद्रीशुना
सीरीयास्ते प्रधानग्रहणाच्चास्तेषामुपांशुत्वं भवतीत्यर्थः। धिष्ण्याप सु० त्राः॥ तेत्रेण सहितानां उपां
शुत्वो भवति॥ पौनराधेयी किंच० जाता॥ यस्मात्पिराम्नाता पुनराधेयेष्टिः। सा चोत्तमादनुयाजात्
ऊर्ध्वं तत्रोपांशुर्भवति। अपि वा सुमंद्रतंत्राः। यासु सतंत्रमुपांशुत्वं विहितं ताः सर्वाः सुमंद्रतंत्रा वा भवे
युः। सुमंद्रतंत्रा इति मंद्रेपियि पूर्वंतराय मास्ते प्रयोक्तव्यं तासां तंत्रं। प्रधानं तूपांश्वेवेत्यर्थः॥ आगूः
प्रणव० सर्वत्र॥ प्रणववत् आदेना त्रानुवाक्याप्रणव एव गृह्यते। आगूर्वषट्कारे साहचर्यात्। आगु
रादयः सर्वे विषये उच्चैर्भवंति। न कश्चिदपि विषये तेषामुपांशुत्वं स्यात्॥ नत्याग्रयं० यं। अग्रेभ
व० अग्रं० आग्रयणो यस्य प्रथमं हविः। आग्नेंद्र ऐंद्राग्नवा। तदुच्चैर्भवति॥ आलार्यस्तु प्राण० नुवाक्यायाः॥
पुरोनुवाक्यायाः प्रणवस्योच्चैर्ष्व विहितं। स प्रणवः पुरोनुवाक्यायाः प्राणसंततः कार्यः॥ नत्यागूर्व० ज्या
याः॥ तथैतौ याज्यायाः प्राणसंततौ कार्यावित्यर्थः। आगुरादिभिः प्रसिद्धो च स्वरैः याज्यानुवाक्ययोः
प्राणसंतानविधि सामर्थ्यादेवोपांशुत्वं सिद्धं भवति प्राणसंततः प्रणवः नत्यागूर्वषट्काराविवेता

॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वनेव याज्यानुवाक्ययोरूपं श्रुतस्य प्राणसंतानस्य च सिद्धौ सत्यामपि याज्यानुवाक्याग्रहणं करोति
तज्ज्ञापयति अनुवाक्याया याज्यायाश्च पृथक्‌रूपस्य प्राणसंततेनेन आगूः प्रणव वषट्‌कारा वक्तव्याः
ऋगंतैश्च ऋगाद्यैश्च पुनेरन्यः संहितो विकारो मा भूदिति॥ तंत्रस्वरा० ह्यानि॥ तंत्रस्वरा अंतो मंद्र
णस्येवमादिभि विहितास्ते तंत्रावयवसंबंधत्वात् तंत्रे स्वरा इत्युच्यंते। तेषां तानि तंत्रस्वराणि उ
पांसुयाजसंबंधानि यान्युच्चानि आवहादीनि आगुरादीनि च तानि तंत्रस्वराणि भवंति॥ मंद्राण्युपां
शु०त्राणां॥ उपांशुतंत्राणां तान्युच्चानि मंद्रस्वराणि भवंति। न तंत्रस्वराणि भवंतीत्यर्थः॥१३॥ प्रात
र्वै०स्या॥ प्रातरित्युच्यते प्रयोक्ष्यमाणः पूर्वे धुरि सन घृतनविभक्ति दर्शनात्। पूर्वे धुरेव वैश्वदेव्या
अपि यागः प्राप्नोतीति तन्निवृत्त्यर्थं। अतः पूर्वे धुरूपक्रम्या परेद्युः प्रातर्वैश्वदेव्या यद्वाभिस्यर्थः॥
अग्निमंथनार्था ऋचः अग्निमंथनीयास्ताः प्रेषितोऽनुब्रूयात्। प्रेषितवचनमस्यानुवचनस्य प्रैषए
व निमित्तं। नाम्नात्। अनाम्नानेऽपि प्रेषितोऽनुब्रूयादेवेति। सामिधेनीस्थानस्य पश्चादवस्थाचेत्येता
वनेव पदमात्रेऽवस्थानस्य सिद्धौ सत्यां पदमात्र इति वचनं पदमात्रेतीतज्ञापनार्थं। अभिहिंकृत्येति
वचनं अस्यानुवचनस्याभिहिंकारप्रतिषेधे सत्यपि अभिहिंकृतिसिध्यर्थं। न याचवध्यति। प्रात
रन्वाक्यासमनभिहिंकृतानि इति॥ अभिताद्देव० प्रेषात्॥ ताम् अग्न इति तिस्र ऋचः तासामुत्तमम
र्धर्चे विरुद्धाय दवसानं तत्रावसायारमेत्। आसंप्रेषात्। आसंप्रेषश्रवणात्। नोत्तरामाददीतेत्यर्थः॥
अन्यत्राप्यंतर्ऋ०वसाने॥ अन्यत्रापि विषये ऋचामध्येऽवसाने यत्रारमेदिति विधिरस्ति तत्राप्यास
प्रेषान्नोत्तरामारभेत॥ अग्ने हंसि न्य० राजन्मनः॥ मथ्यमानोऽग्निर्यदि न जायते तदा तत्रैवावसाने
स्थित्वा ऽग्ने हंसीत्यावपेत्। पुनः पुनरसकृदप्यावपेत। अग्नेराजन्मनः आजन्म इति वचनात् जातेस
ति संप्रेषात्प्रागपि स्रुक्कस्य कांचित् अध्यवमारभेत। एतस्मिन्नेवावसान इति वचनादेतस्मिन्नेवार्ध
र्चावसाने ऋगंतरमावपेन्नान्यत्र। अन्यत्र ऋगंत एव ऋगंतरमावपेतेति गम्यते। तेन यदा पूर्वसंस्का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्र॰सू॰वृ॰ ॥२०॥

रेषं जनो ध्रुवणपरिध्यधणेषु पदार्थानुसमयं कुर्वंति। बहुरूपे कर्मणि न दाऋगंतेऋगंतरावापः सिद्धो भ
वति। पादग्रहणसूक्तग्रहणयोः प्रयोजनं आवापपूर्वावधिकारेऋक्। परा ऽवधिः सूक्तं। तन्नेकस्याः द्वयो
र्बह्वीनां वा ऋचां सूक्तस्य वा वापः सिद्धो भवति। आवृत्तौ च सूक्तं समाप्यैवावृत्तिरित्येवमादि। जातश्रुतान॰
यात्।। जातश्रवणानंतरं अग्निर्हंसीत्यस्य सूक्तस्य यः प्रणव ओगश्रुति तेन त्रिर्जानमेर्धर्च मुपसंतनुयात्।।
त्रिष्टुभेनोत्तरां। अनावापपक्षे जातश्रवणानंतरमेव त्रिष्टुभेनार्धर्चेनोत्तरामृचमुपसंतनुयात्।। उत ब्रुवंतु जं॰
ये ति विधानात्।। पशेनेत्यनयर्चा परिदध्यात्। समापयेदित्यर्थः। सर्वत्र शस्त्रादिषु योत्तमा ऋक् तया परिधा
नीयेति विधानात्।। धाय्ये विराजौ॰ स्यव्यंतीति।। बर्हिरग्नरिति प्रयाज्यानंतरमेतानावपेत्।। अग्निः सोमः॰
पिबी।। अस्मै देवताः स्वतवस इति मरुतां गणः। आ विश्वदेवं॰ तुरायेति।। अस्मिन्पर्वणि निर्गुणा नाम रुता
मेत एव भवतः। प्रकरणपठितत्वात्। गुणत्वे रस्य च स्तुत्यर्थतया प्यन्वयसंभवात्।। न वानुयाज्याः॰ यंतीति।।
अनुयाज्यानामेष देशः स्मृतः। अनूयाज्यानां सूक्त॰ स्यादेशः। त्रयाणामन्यतमस्मिन्काले वाजिभ्यो यागः क
र्तव्यः। वाजिनं च तस्य द्रव्यं। द्रव्यता देन कर्मणः स्वयव्हारार्थः। तद्वचनमनावाह्येत्यावाहनप्रतिषेधाय
मनुवादः। अपूर्वत्वादस्य कर्मणः। अपूर्वत्वं च पूर्ववत्वे कारणाभावात्। द्रव्यदेवतासंबंधमात्रमत्र चोद्य
ते। नैतावता प्राकृतधर्मसंबंधोस्ति। उक्तं च प्राकृतधर्मसंबंधे कारणं। निर्वपत्यादितस्य च वात्राभावः।।
तेनापूर्वत्वं निश्चीयते। इष्टिरूपत्वाच्च नाचास्य नास्ति। तेन चापूर्वत्वं। तस्मात् पूर्वत्वादुत्तरेष्वपि निग
मेषु निगमनं नास्ति। आदेशवचनं वाजिनामन्वायात्यसंज्ञायनिवृत्त्यर्थं। तत्रायं संशयः। किं पस्य क
स्य विप्रधानस्यानुपश्चादायात्य ते क्रियते तत्सर्वमन्वायात्यमुतान्वायात्यसंज्ञ द्रचोदितमेवेति। तत्र त
च्छब्दचोदिते चातच्छब्दचोदिते चान्वायात्यसंज्ञाप्रवृत्तिनिमित्तस्य विशेषाभावाद्यधर्तिकंचिदन्यानुप्र
वेश्य तत्सर्वमन्वायात्यमिति स्मृता। वाजिनामपि अन्वायात्यत्वादनादेशः प्राप्नोति। एवं प्राप्ते ऽनुप्रवेशि
नामादेशं विदधन्नानुप्रवेशित्वमन्वायात्यत्वे निमित्तमिति दर्शितवानाचार्यः। अन्तस्तच्छब्दचोदितमे

॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वान्वायास्यमि निसिद्धं। एतदेवादेवा वचनस्य प्रयोजनं। नान्यदिति मंतव्यं॥ नो॰ज्यां॥ ऊर्ध्वज्ञुरूर्ध्वजानुः।
याज्याग्रहणस्य प्रयोजनमनुवषट्कारेऽूर्ध्वज्ञुता मा भूदिति॥ अग्नेवीही॰ति वा यत्रक्वचैकसंप्रैषे॰येत॥
संव्यवहारार्थमिदं। यत्रक्वचविषये एकस्मिन्नेवाध्वर्युसंप्रैषे तुल्यरूपा चतुल्यरूपो वा द्वौ वषट्का
रौ भवतः तत्र तौ वषट्कारौ समस्तावेव। वागोज इत्यादिना द्विरनुमंत्रयेत॥ नत्वागू॰स्मिन्॥ यापा
दावागूर्भवती सुक्त्वा दनुवषट्कारेऽप्यागूः प्राप्तो निषेधः। आगुरः प्रतिषेधो याज्याधर्माणामितरेषां प्रा
पणार्थं॥ वाजिनभक्ष॰त॥ इडान्ते वाजिनभक्षार्थपात्रेणानीतं इडामिवान्तरेण प्रतिगृह्याञ्ज
लौ निधायोपहवमिच्छेत। भक्षणानुज्ञापनार्थं। वाजिनभक्षसंबंधिनः सर्वान्याचेतेत्यर्थः। सर्वे
षु भक्षसंबंधिषु उपहवयाचनं कर्तव्यमित्युक्ता न दनेन क्रमेणैव प्रकारेण वाक्येनेत्याह॥ अध्वर्युप॰
एते आदितोंततोन्ये भक्षिणः। वाक्यं च एवंप्रकारं कर्मना
यस्येति॥ वचनसामर्थ्यादेवैषामयं क्रमः। एतदपि लब्धं भवति। अतिवचनरा
मध्ये यथायुक्तमिच्छेत् तत्सर्वमवगम्यते। अतोंततो यजमानोपह्वयस्वेति। इति रहस्यग्रहणं भवति॥ यन्मेरेतः
इरस्यास्मिंश्चास्त्रेऽनुक्तत्वाच्चस्य चापेक्षितत्वाच्छास्त्रांतरोक्तस्यापहूत इति। एवमध्वर्युं॰न्यो॰श॥ एते च प्राण
प्रसि॰क्षयेत्॥ तस्य वाजिनस्य किंचिदादाय अनेन मंत्रेणावजिघ्रेत्। तस्यापि प्राणभक्षणनियमार्थं॥
भक्षं भक्षयेयुः। अध्वर्युग्रहणं भक्षणेऽपि क्रमोऽस्तीति ज्ञापनार्थं। यजमानः प्र॰क्षिताः॥ यजमानादित
अतो होतुर्भक्षणानंतरं अध्वर्य्वादेः क्रमेण भक्षणं सिद्धं भवति॥ तत्र गृहपतेश्चान्येषां च प्रत्यक्षमे
रेव यत्र दीक्षिता भवंति तत्र सर्वे प्रत्यक्षमेव भक्षयेयुः। तच्च सत्रे संभवति। यस्मिन्नहनि वैश्वदेवी क्रियते तस्मात्
वेत्यर्थः। तत्र च क्रमो मुख्यादिग्रहपर्यंतः॥ पौर्णमासेनेष्ट्वा॰पेयात्॥ पौर्णमासेनेष्ट्वा व्रतानि कर्तुमारभेत। पौर्णमासीयागवचनं
परस्मिन्नहनि पौर्णमासेनेष्ट्वा तदानीमेव वक्ष्यमाणानि व्रतानि कर्तुमारभेत। अनन्तरं दिनमानसानियम उच्यते। अतः
त्रनारंभकाणुविधानार्थं निसानाममनिवर्तकत्वादविरुतीनामिति।

९३

१०५।२०
॥२३॥

केशनिवर्त्तनादीनि कुरिष्ये । मध्वादीनि वर्जयिष्ये । इतिहृष्ट संकल्पो भवेत् । एतद्व्रतरूपं निवर्त्तनादीनि
च कुर्यात् मध्वादीनि वर्जयेच्च । न केवलं संकल्पमात्रमेव ॥ केशानि॰यीत ॥ निवर्त्तनं कर्त्तव्यं ॥ श्मश्रूणि
वापयीत ॥ मधु॰ञ्चायीत॰र्जयेत् ॥ केशप्रसाधनादीनि स्वैरिकर्माणि । अत्र लेखनन्त्रादेनोच्यते । पूर्वाणित्री
णि कार्याणि । पराणि पंच वर्जनीयानि । एतानि चातुर्मास्यव्रतानि । चातुर्मास्यव्रतवचनं सर्वेषां पर्वणां
पर्वणामेतानि व्रतानि । नेकस्यैव संनिहितस्य पर्वणः इत्येवमर्थं । ऋतौ भा॰यात् ॥ स्त्रीगमनं प्रतिषि
द्धस्य कालविशेषे प्रतिप्रसवोयं । वापनं स॰र्वसु ॥ उत्तरविवक्षार्थोयमनुवादः ॥ आद्यन्त॰र्वा ॥ आ
द्यान्तमयोर्वा पर्वणोर्वापनं । न मध्यमयोरित्यर्थः ॥ अनुवादाभावे आद्यन्तयोरेव वापनं स्यात्तच्च विकल्पे
न मध्यमयोर्वापनप्रसंग एव नास्तीति गम्यते । तेनाद्यन्तयोर्नित्यं वापनं मध्यमयोरनित्यमिति सिद्धं
भवति ॥ १४ ॥ पंचम्यां पौर्ण॰वासेः ॥ यस्यां पौर्णमास्यां वैश्वदेवी कृता तामारभ्य या पंचमी पौर्णमासी
तस्यां वरुणप्रघासकेर्यष्टव्यमित्यर्थः ॥ पश्चाद्दर्शपौर्ण॰पश्यते । वेदिः पश्चादिति सदर्शनार्थं । प्रणीय
मानस्याग्नेः पश्चादित्यर्थः । प्रैषितवचनमुक्तप्रयोजनं । अग्निप्रणयनीया अग्निप्रणयनार्थः ॥ प्रदेवं दे
व्या॰सप्रणवां ॥ उपविष्टस्यैवासीनइतिवचनं व्रजतस्त्वपि प्रथमाम् समाप्य मानुव्रजनायोत्तिष्ठेदित्ये
वमर्थं । सप्रणवां समानप्रणवामित्यर्थः । प्रथमायास्तृतीयप्रणवे ऽवसाने पितृमात्रएवेत्यर्थः । तत्रस्थे
नास्थान॰द्यते ॥ तत्र प्रणवेनावसाये त्येतावतैव सिद्धे स्थानात्स्थानसंक्रमण इतिवचनं अस्य विधेः
सर्वार्थत्वाय तत्रोपांशुस्वरस्थानात्स्वरान्तरस्थानसंक्रमणे प्रणवेनावसाय अनुब्रूयेयवृत्तरां ऋच
मारभेत । ऋगन्ते श्वासस्य प्राप्त्यभावे सत्यपि अनुच्छ्वासवचनमवसानविधिबलात् उच्छ्वासोपि प्राप्नो ॥२४॥
ति । तितं निवृत्त्यर्थमनुच्छ्वासविधानं तेन अवसानविधानमुच्छ्वासार्थं साधितं भवति । अतो यत्रोच्छ्वा
सप्रतिषेधः । तत्रावसानमपि न कर्त्तव्यं भवे इत्यागावानादौ । अग्निमंथनाग्निप्रणयनादयो मंद्रस्वरेण प्रयो
क्ष्याः । प्राथम्यात्तस्य स्वरस्य । न इति क्रमणे कारणाभावात् । अतो मंद्रस्वरेण सत्र पूर्वविधेरभावात् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्राणसंतनं०यते॥यदिदमवसायानुष्ठस्य उत्तरामारभत इति तत्त्राणसंतननं भवतीति विज्ञायते श्रय
न इत्यर्थः॥उत्तरमग्नि०त्तराः॥अनुब्रूयादिति विशेषः॥द्वयोः प्रणीयमानत्वादुत्तरमिति विशेष्यते॥अग्नि
द्वित्वेप्याहवनीयद्वित्वाभावान्मंत्राणामूहो नास्ति॥इमं महे विद०थोराद्ये॥समानजातीयत्वादेनाभ्यां
चाग्नः प्रदेवमित्यस्याः॥अयं राजन्यवैश्ययोर्विशेषः अन्यत्समानं॥पश्चादुत्त०स्थाय॥शेषसमापये
दिति विशेषः॥वेदिद्वित्वादुत्तरस्या इत्युच्यते॥उत्तरवेदेस्तु०षु॥पश्चादवस्थाय समापयेदिति विशेषः॥नि
हितेग्नौ०विसर्जेन॥अत्र निहितेग्नाविसुत्तरादानस्य निमित्तत्वाध्वर्युसंप्रैषः तस्मिन्नेवेति यस्मिन्नि
दमनुवचनमारब्धं तस्मिन्नेवेत्यर्थः॥अन्यत्रापि यत्रा०जेत॥तत्राप्येवं कर्त्तव्यमिति विशेषः॥अनुब्रूहीति
तिवचनं अनुवचने एवैतत्॥स्वाम्नातिश्रवनादिष्विसेवमर्थः॥तिष्ठत्संप्रैषेषु०सर्गः॥तिष्ठतः संप्रैषेषु
तिष्ठत एव वाग्विसर्गो भवति॥अग्निमंथ०देव्या॥इयमिष्टिर्वैश्वदेव्या समाना भवति॥द्वयोरपि मथ्य
मानयोरग्निद्वित्वं नास्ति॥एकस्यैवायमग्नेर्विभाग इति कृत्वा अन्वाहनाऽहवनीयाभिधायिना प्रयोगसि
ध्यर्थं॥अग्निमथनादि समानावचनं॥हविषानुस्तरणेषष्ठ०कः॥अयमत्र विशेषः॥षष्ठ्याघास्तिस्रः उद्
त्य इदं द्याग्न्यादयश्चतस्रः कर्त्तव्या इति॥इंद्राग्नी अवसा०तनीयः॥उपहवयाचने ऽयं तृतीयो भवति॥भक्ष
णे चतुर्थो भवति॥उपहवयाचनं होत्रादियजमानांतं॥होतुरध्वर्य्वादियजमानस्याग्नीदंतं॥भक्षणं तु हो
त्रादियजमानांतमेव॥वैश्वदेव्यामप्येवमेव॥संस्थिता०जंति॥संस्थितायामिष्टौ अवभृथकर्मार्थमु
दकं गच्छस ध्वर्यवइत्यर्थः॥तत्रावभृथे०रूता॥रूत्तिरेवरूतं॥रूतं वा रूतं च यस्याः सा रूता रूता॥अनित्ये
त्यर्थः॥इष्ट्यभावे यदन्यदप्यवधानादि तत्सर्वं भवति॥तामुपरिष्टा०पशुः॥वरुणप्रघासपौर्णमासीमा
रभ्यतत्॥यस्या पौर्णमास्या मित्यर्थः॥अनेन चातुर्मास्यांगत्वेन पश्वंतरं विधीयते॥नानेन निरूढकालो
विधीयते॥अतो निरूढोपि स्वकाले कर्त्तव्य एव॥१५॥न धानतः साक०धाः॥यथा वरुणप्रघासेष्वैंद्राग्न

96

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९५०वृ० स्तं पाऐंद्राग्नात्साकमेधाः। द्वयोर्मासयोरित्यर्थः। अनीकवदादीनामादित्यांतानां साकमेधा इति नाम॥ पूर्वे
॥२८॥ द्युस्ति० वनं॥ यस्यां पौर्णमास्यां साकमेधाः प्रयुज्यंते तस्याः पूर्वेद्युः सवने सवने एकैकेष्टिः कार्या॥ प्रथमा
या मग्निरनी० नीकवंता॥ मरुतो गृहमेधिनो देवता। आज्यभागप्रभृति स्विष्टकृदंतां चेति॥ गृहमेधास०
महासीति॥ अम्नातत्वादेव एव गृहमेधे ध्यो भवतः॥ पुष्टिमंतो० गृदे॥ इह विराजौ संयाज्ये इत्युक्ते। तेसं
याज्ये अनिगदे निगदरहिते भवत इत्यर्थः। निगद इति अयाडग्निरित्यादि जुषतां हविरित्येवंतमुच्य
ते॥ अन्यत्राप्युना० ने॥ गृहमेधीयादन्यत्रापि यत्रावाहनं नास्ति तत्राप्यनिगदे संयाज्ये भवतः। अन्य
त्रापीति योगविभागार्थमुच्यते। तस्य प्रयोजनं। अन्यत्रानावाहने निगदे भवतः। इह त्वावाहने अन्
नावाहने वा अनिगदे एवेत्येवमर्थं। अत एवात्र प्रसंगावाहनमप्यस्तीति ज्ञापितं भवतीति गम्यते।
पूर्वसूत्रे संयाज्याग्रहणस्येदं प्रयोजनं। इदमनिगदत्वविधानं संयाज्यामात्रस्य न विराजयोरेवेति ज्ञाप
नार्थं॥ आवाहने पि पित्र्या० नौ च॥ अनयोरावाहने सत्यपि अनिगदे एव भवतः॥ बहुचैतस्यां० सुवी
रन्॥ प्रसुवीरं निति बहुवचनं लोके यथा रोबहवद् इति प्रसुवीरं दद्युरित्यर्थः। एतस्या रात्र्या इति वचना
द्रात्राविवेष्टिः परिसमाप्यत इति॥ तस्या विवासे० कुर्युः॥ विवासो रात्र्याः पश्चाद्भागः पौर्णदर्वमिति कर्म
नाम। तत्तस्मिन्काले कर्तव्यं॥ ऋषभेण्वे॥ ऋषभेरुवति॥ स्तनयि० वा॥ मेघे वा रुवति॥ आग्नी अंहे
केरा० वदंतः॥ तस्याप्यभावे ब्रह्मपुत्र आदेनाग्नीध्रसंबोध्यरावयंति। ब्रह्मपुत्र वदंतः तस्याप्यभावे।
ब्रह्मपुत्र आदेनाग्नीध्रसंबोध्यरावयंति। ब्रह्मपुत्रा रारूह सेव॥ यदि होतारं० ददतेददिति॥ एतेकुं
तो व्यर्थं वा यदि होतारमपि चोदयेयुः। अनुब्रूहि यजेति न दैते याज्यानुवाक्ये भवतः। यातकृतु लिंगोप
स्थांतरे ए इ पौर्णदर्व्य इत्याम्नानाद्वा इंद्रोस्य देवता भवति॥ मरुद्भ्यः क्री० नरा॥ इष्टिरित्यर्थः॥ पुनब्रुवं
तु० स्त्रो॥ आज्यभागौ परौ सवार्त्रघ्नौ भवतः। क्रीळव तृ० स्वच॥ क्रीळिनामेते अम्नाते। अंः क्रीळिना
मित्येते याज्यानुवाक्ये भवतः॥ जुष्टो दमूना० पासे॥ मा हेळी तोस्निनाम। आमिक्षा भाग देववाजिना भावे

॥२८॥

सिद्धे वाजिनप्रतिषेधं कुर्वन्वाजिनस्य प्रधानसंबंधं दर्शयति। ते वाजिनस्य मध्यमः स्वरः साधितो भवति॥
हविषां तु समं० कर्मा॥ वृत्रहान्द्र इंद्रस्य गुणः। आ शास्त्रिस्त्रो विकल्प्यते। विश्वकर्मास्य। अतो णावत्र दे
वताः॥ आ नूनमिंद्र वृत्रहन्०मेति॥ १८॥ दक्षिणाग्नेरग्नि०स्वेता। दक्षिणाग्नेरग्निमानीयातीस्य न देवतम
स्यत्र निधाय तस्मिन्नग्नौ पित्र्यानाम कर्म कर्त्तव्यं। अतिप्रणीय पित्र्येति वचनात्तस्मिन्नेव पित्र्याण्यवेत।
नेमिति किंतु आवाहनीयादिष्वेव। आहवनीयोप्यत्र विहरणीयः। उत्तरत्रोपस्थानदर्शनात्। सान्नाय्यवता
नेमिति किंतु आवाहनीयादिष्वेव। आहवनीयोप्यत्र विहरणीयः। अतिप्रणीतचर्यायां अपि आस्वतादि धर्मप्रापणार्थ॥
साग्रहणयोगविभागार्थः। योगविभागप्रयोजनं अनतिप्रणीतचर्यायां। किंतु अनुमंत्रणलोपप्रतिषेधात्तज्जपादीनां ष
लुप्तजपा०वर्जे॥ जपप्रदेनात्र न केवलो जप एव गृह्यते। किंतु रक्षां निगदस्यात्रिलोपः सिद्धो भवति।
पमांडपलक्षणार्थमिति गम्यते। नानस्योपांशुप्रयोज्यस्यापि। तेन रक्षां निगद एकदेशस्य उपांशुत्व सिध्यर्थं न जपदिति
लुप्तजपायस्याः सा तु तज्जपा। होतारमरथा इत्यस्य निगद एकदेशस्य उपांशुप्रतिप्रसव एव॥ तस्याः प्राचि०
वचनेन जपग्रहणं कथालोपग्रहणं कानिवृत्त्यर्थं। तद्वर्जे न वचनं इतरयोः प्राप्तस्य प्रतिप्रसव एव॥ यानि प्रकृतौ प्राचि कर्माणि
णा॥ तस्याभिति वचनं कृत्स्नप्राप्त्यर्थं। प्रकृत्यात ऊर्ध्वमिस्यत्रापि प्रापणार्थो। यानि प्रकृतौ प्राचि कर्माणि
णा॥ तस्याभिति वचनं कृत्स्नप्राप्त्यर्थं। प्रकृत्यात ऊर्ध्वमिस्यत्रापि प्रापणार्थो। यानीतरदिङ्मुखानि
प्राङ्मुखानीत्यर्थः। नान्यस्यां दक्षिणामुखानि कर्त्तव्यानीत्यर्थः॥ इतराणि०न्वयं॥ यानीतरदिङ्मुखानि
प्राङ्मुखानीत्यर्थः। नान्यस्यां दक्षिणामुखानि कर्त्तव्यानि। दक्षिणां दिशं प्राचीं कृत्वा
प्रकृतौ तान्यस्यां निर्दिष्टदिक्कानि अनिर्दिष्टदिक्कानि च तथान्वयं कर्त्तव्यानि। दक्षिणां दिशं प्राचीं कृत्वा
प्रकृतौ तान्यस्यां निर्दिष्टदिक्कानि अनिर्दिष्टदिक्कानि च तथान्वयं कर्त्तव्यानीत्यर्थः॥ उक्तं तस्याः०धेन्यः॥ एतामृचं त्रिरनुब्रूयात् तार
तदनुसारेणान्यदिङ्मुखानि कर्त्तव्यानीत्यर्थः॥ उक्तं तस्याः०धेन्यः॥ तासामुत्त०पत्तिः॥ तासां सामिधेनीनां
त्रिवचनात्ता एव सामिधेन्यो न पुनरभ्यसितव्या इत्येव गम्यते॥ तासामुत्त०पत्तिः॥ नाग्ने महानित्यादि परि मृत
उत्तमेन प्रणवेनावह देवान्पिहव्यज मानायेति प्रतिपत्तिरेव संधेयाते। नाग्ने महानित्यादि परि मृत
सीस्वं तन्तुप्यते। प्रतिपत्तिश्चैवं रूपा भवति पित्र्यायां। प्रकृतौ देवा इत्यंतरेतरेषां संकीर्त्तनं कृतं। इह चेद
वाश्च पितरश्चेज्यं न रति पितरा देपि प्रयोक्तव्य इति। सर्वत्र देवशब्द एवतिमंत्रे पितरादेन प्रयोज्यत्तेनप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रु॰सू॰वृ॰
दे॰१
॥२३॥

मे स्वार्थ एवं न्यायः प्रयोज्यो न परार्थ इति सूत्रार्थो योऽन्यत्र परार्थत्वादप्रयोगं मन्यमानः। तत्सहितं प्रतिपत्ति
वाक्यं पठितयाऽतेनान्यत्र पितृयज्ञादौ न प्रयोक्तव्य इति सिद्धं। प्रतिपत्तिवाक्यमुक्त्वा ततो वक्ष्यमाण देव
ता आवाहयेत्॥ अग्निं हो॰ येत्॥ आज्यपान देवता आवाह्य प्राक् तस्य स्विष्टकृतो वाहनस्योपकारकृता
तत्स्थाने अग्निं कव्यवाहनमावाहयेत्॥ उत्तमे चैनं॰ गमयेत्॥ उत्तमे च प्रयाजे प्रागाज्यपेभ्यः अग्निं कव्य
वाहनं निगमयेत्॥ सूक्तवा॰ स्थाने॥ निगमयेदिति वर्त्तते॥ नेह स्रा॰ न्नाः॥ कार्यार्थत्वान्मंत्राणां मंत्रलो
पेपि कार्यस्यालोप इति कृत्वा कार्यस्यापि प्रतिषेधः क्रियते॥ न वर्हिषंतौ॰ याजो॥ नेळायां॰ णं॥ भक्षेषु
प्राणभक्ष इति प्राप्ते इळायां भक्षणमेव नास्ति। कः प्रसंगः प्राणभक्षस्येत्यर्थः। भक्षवचनं प्रकृताव
वांतरेळा भक्षादन्य इळा भक्षोस्तीति ज्ञापनार्थं। इळायामिति सप्तमी निर्देशादिळाविषयं प्रकृतसमि
तिगम्यते। नेळाया एव भक्ष इति तेनावांतरेळा भक्षणमिळा भक्षणं चात्र नास्तीति गम्यते॥ न मा॰
र्जनं॥ इळा भक्षणांगत्वा देवमार्जनाभावे सिद्धे तदभाववचनं तदंगत्वज्ञापनार्थं॥ न सूक्तवा॰ देवताः॥
स्रुक्स्रुवाके यजमाननाम तन्नादेश्यं। सूक्तवाकवचनं स्रुग्गापनादिष्वर्थ्यादिनाद प्रसंगनिवृत्त्य दा
र्थ॥ ईक्षितः सीद होतरिति वोक्त उपविशेत्॥ उत्तरस्योपवेशनस्येदं निमित्तद्वयं विधीयते। प्रादेशा
करणाद्यर्थत्वात्पूर्वस्य न तदभावे भावः प्रादेशस्याभाव उक्तः॥ अनुमंत्रणमप्यत्र नास्ति। अनुमंत्रणा
प्यायनोपस्थानानां मंत्रारूढरूपत्वात् क्रियायां मंत्राभावे क्रियाया अप्यभाव इति। तस्मादत्र पूर्वमु
पवेशनेनास्ति मानुषवाद प्रत्याम्नाय ईक्षणादि तत्त्वा लोपविशेत् इ सुक्तत्वात्॥ अभिक्रमणादि सर्व ॥२३॥
न भवति। निरसनोपवेशनं वर्हिरुपस्पर्शनादि मंत्ररहितानि कुर्यादेव॥ जीवा॰ स्त्वरंति॥ उपस्थवि
धानं येषां तदंगं तेषामेव। हविर्ग्रहणं प्रधानेष्वयं धर्म इति ज्ञापनार्थः। तेन प्रधानमध्येपि यत्प्रायश्चि
नत्वेन प्राप्तं तस्यायं धर्मो न भवतीति गम्यते॥ दक्षिणआ॰ वानं॥ अत्रानुवाक्याकार्यस्यैकत्वात्॥ म
ष्य प्रणवो नास्ति॥ ओं स्वधे॰ संप्रैषः॥ धावेतो संप्रैषो॥ अनुस्वधा इत्येके। स्व ध्येसपरे। एकवचने जात्यपि

98

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रायं॥ अनुस्वधास्वधेति दीर्घं पठितव्यः॥ ये स्वधेत्याग्नं॰कारः॥ अत्र ओं स्वधेत्यादयः स्वधान्ताः दीर्घा
ता एव प्रयोक्तव्याः॥ अध्वर्युः संप्रेषया प्रयोजनेन तदेव श्रुत्वा स्वकार्यकरणार्थं॥ निस्याः पु॰ण्याः॥ उक्ताः पु
नयः प्रकृता वा ये द्विता ये उपांशु च यदस्य स्थ प्रतिः एतेष्वपि तदस्य स्थेव कार्यस्यार्थः॥ पितरः सोमवंतः॰
नायमः॥ पितृणां सोमवत्ता गुणः। सोमस्य पितृमत्ता गुणः। बर्हिषदो ग्निष्वात्ता इति च पितृणामगुणः।
आद्यैवैकल्पिके॥ उदीरतां॰ महीरनु॥ पंचानां तिस्रस्तिस्र ऋचः॥ वैवस्वं॰ज्या॥ यदियमो वैवस्वतो देव
तान उत्तमे त्रिके मध्यमा ऋग्याज्या भवति। प्रथमोत्तमे अनुवाक्ये इति॥ यतानुषु॰मा न इति॥ स्विष्टकृ
त इति विशेषः॥ अग्निः स्वि॰न॥ प्रकृतो योऽग्निः स्विष्टकृत् इह तत्कार्यकरोऽग्निः कव्यवाहन इत्यर्थः। तेना
त्र स्विष्टकृत्पदेन प्रयोक्तव्यः। प्रकृत्यानूर्ध्वं। स्विष्टकृतदूर्ध्वं प्रकृत्या भवति। सव्योत्तर्युपस्थतादयो न भ
वंतीत्यर्थः। वचनमिदं स्विष्टकृत्यपि प्राप्त्यर्थं। अंगत्वादेव उत्तरत्र प्राप्त्यभावात्॥ वषट्कारक्रि॰यात्॥
मन्त्रलोपप्रवादेन पूर्वोक्ताः सर्वे विकारा लक्ष्यन्ते। तेष्वन्येषां सव्योत्तर्युपस्थतादीनामभावाय प्रकृति
भावो विधीयते। प्रधानेषु स्विष्टकृति च स्वधाकारं वर्जयित्वा वषट्कारेण क्रिया चेत्। ऊर्ध्वमाज्यभागाभ्या
मिति वषट्कारक्रियास्थानलक्षणार्थं। तेनाज्यभागाभ्यामूर्ध्वं स्विष्टकृत्सर्वं तत्स्थाने वषट्कारक्रिया
यां प्रकृत्या भवतीति गम्यते। तत्र मन्त्रलोपादिः पूर्वो विकारः सर्वप्रकारायां पित्र्यायामासमाप्तेर्भवत्येव॥ यो अग्निः क॰ज्ये॥
एकैका॰न्या॥ प्रकृतिभावादेव एकत्वे सिद्धे एकवचनमिदं तयोरेकैकस्याग्रहणार्थं॥
वषट्कारक्रियायामेव॥ भक्षेषु॰ते॥ उभयतो विहारादनियमे प्राप्ते नियमार्थं दक्षिणा इति वचनं॥
अनारस्यानतिं॰र्यायां॥ अनतिप्रणीतचर्यायां पित्र्यायामावर्तनमरुते वोपतिष्ठंते न पश्चादभिमुखत्व
संभवात्॥ अया विं॰ते ति॥ अयं दक्षिणाग्नेरुपस्थाने मन्त्रः॥ आ रस्यस्तेवं॰रो॥ अतिप्रणीतचर्यायां दक्षि
पार दक्षिणाग्नेरुपस्थानमुक्तं। अनतिप्रणीतचर्यायामनारस्य तस्यैवोपस्थानमुक्तं। इदानीं गार्हपत्या
हवनीययोरुपस्थानमुच्यते। तुल्ये दोषविनिवेशः? एवमादावधारणार्थः। अतिप्रणीतचर्यायामनति
प्रणीतचर्यायां च गार्हपत्याहवनीययोः आ रसेवोपस्थानमिति॥ आहव॰पत्न्या॥ पंक्तिवचनं प्रतीकस्य दहनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तै० पू० २०

॥२५॥

वस्सर्थः॥ गार्हपत्यमग्निं॰न्य इति॥ एकपदर्चानसूक्तेन उत्तरत्र सूक्तेवचनात्॥ अथैनमभिसमापयंतिमा॰पंतः॥
एतेसूक्तेजपंतः॥ एनंगार्हपत्यमभितः समापयंति प्राग्दक्षिण्येन॥ पूर्वेणगार्ह॰न्त्रजंति॥ गार्हपत्यस्य पुरस्ताद्घो
देव्नास्तस्मिन्देशे यथासूक्तेसमाप्यतेतथासमापयंति॥ सूक्त॰ग्रहणमग्निंतमन्य इति अत्रकेऋग्ग्रहणार्थः॥ यदी
ह्निंसमाप्यापति ष्वंनेनदानतस्त्र्यंबकात्रजंति॥ यदानुयाजांभ्यांप्राक्तनदासमाप्यत्र्यंबकार्थंत्र्यं पुः॥ त्र्यंबका
नामकर्मविशेषाः॥ तत्राप्यर्थवः॰थते॥ तत्रयदध्वर्युणोक्तंतदस्माद्दीर्घैरपिकर्त्तव्यमित्यर्थः॥ प्रैसा॰रंति॥
अदितिरत्रदेवता॥ नादित्यः आदित्यानायाज्यानुवाक्या उक्ताः॥ अत्रनाम्नानात्॥ पुष्टिमतो॰राजो॥ १०॥ पंच
म्यां॰या॥ साकमेधकालग्नारभ्यया पंचमीपौर्णमासीतस्याशुनासीरीयाकर्त्तव्या॥ शुनासीरीयेतिकर्मनाम॥
अर्वा॰वा॥ पंचम्याः पौर्णमास्या अर्वागपि यत्रकाले कर्तुंसंभवति तत्रवेसर्थः॥ ततोथहे त्र्यहेरतिनाणस्त्रांतरो
केइत्यर्थः॥ वाजिन॰र्यउत्तमः॥ नियुत्वानितिवायोर्गुणः शुनासीरः शुनश्वइंद्रस्यगुणौ॥ प्रथमद्वितीयौवैक
ल्पिकौ॥ पुनस्त्रयोपिविकल्प्यते॥ सूर्यस्योत्तमइतिवचनंदेवतातरप्रवेनोपि सूर्यउत्तमएव॥ अन्यत्रक्रमांतरंभ
वतीति॥ आवायो भूष॰नुवाक्याः॥ याज्यानुवाक्याग्रहणाथ अस्मिन्प्रकरणे आम्नाता याज्यानुवाक्यास्ताएवए
तत्प्रकरणसंबंधिनानां देवतानांनाणस्त्रांतरादागतानामपि कथंचिदपिसंभवेग्रहीतव्याः॥ नान्याइत्येवमर्थः॥
समाप्य॰तुना॥ चातुर्मास्यानामेतावंग भूतौ पशुसोमौ॥ निरूढ्ज्योतिष्टोमप्रकृतिकौ समाप्तिनिमित्ततादि
नयोः॥ चातुर्मास्या॰वापुनः॥ चातुर्मास्यैरिति वक्तव्ये अन्यथावचनंनेमानितदंग भूतानीतिज्ञापयि
तुं॥ तेनपुनरपि तान्येवाभ्यसितव्यानीतिगम्यते॥ अभ्यासपक्षेसमाप्तावपिनैव पशुसोमौ कर्त्तव्यौ॥
तस्यपक्षस्य पूर्वाभ्यांसह वैकल्पिकत्वात्॥ वरुणप्रघासेषूहउच्यते॥ अग्निदत्ता भावादग्निवा
चिनामरूहः॥ घृतवती॥ म॰त्रा २ कर्मउपस्थेयांविश्ववाराइत्यूहः॥ वेदोसीत्यत्र वेदविषयाणां
पदानामूहः॥ अन्यदप्येवंरूपमग्नि ना दन्वेषणीयं॥ १८॥ राम ॥ इत्याश्वलायनसूत्रवृत्तौनारा
यणीयायांद्वितीयोध्यायः॥ श्रीसीतारामचंद्रार्पणमस्तु॥ श्रीकृष्णार्पणमस्तु॥ स्वार्थपरार्थंवा॥

॥२५॥

K K S U LIBRARY
RAMTEK
441 106
(N1063)
Dist. Nagpur

100

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=29.09.20 16:44
,TRANSFERRED=2020/09/29 at 16:57:18
,PAGES=100
,TYPE=STD
,NAME=S0003770
,Book Name=M-1063-AASHVALAYAN SUTRA VITTI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection